वर्षम्-३

अङ्कः-१०

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५१११-१२ वैक्रमाब्दः २०६६-६७ आश्विन-कृष्ण ८ - पौष कृष्ण ११ शकः १९३१-३२ अक्टूबर - दिसम्बर २०१०

## कुलपतिवाक्

राष्ट्रियसंस्कृतसंस्थानेन अस्मिन् वत्सरे केचन अभिनवाः पदक्षेपा विहिताः। प्रतिवर्षं कौमुदीमहोत्सवः संस्थानेन समायोज्यते। इयं संस्कृतरङ्गमञ्चस्य संस्कृतनाट्यस्य वा नवोन्मेषं प्रकटयन्ती भारतीये कलाजगति काऽपि अपूर्वैव घटना भवति। पुरा वसन्तोत्सवनाम्ना अनुष्ठिते अनन्तरं च कौमुदीमहोत्सव इति अभिधानं गते अस्मिन् महोत्सवे सप्तसु पूर्ववर्तिषु महोत्सवेषु अशीतिप्रायाणि संस्कृतनाटकानि रङ्गे अवतारितानि। एतेन संस्कृतस्य छात्राणां कृते नाट्यप्रयोगस्य कापि दिक् उन्मीलिता। इदानीं बहवः संस्कृतच्छात्राः नाट्यशास्त्रे पाटवं प्रकटीकर्तुं सन्नद्धा दरीदृश्यन्ते। ये नाट्यशास्त्रमर्मज्ञाः कलाविशारदाः विशेषज्ञाः सन्ति तेषां सान्निध्ये इमे राष्ट्रियसंस्कृतसंस्थानस्य छात्रा नाट्यविषयकार्यशालासु प्रशिक्षणमपि प्राप्नुयुरुत्येतादृशी व्यवस्थापि सम्प्रति संस्थानेन विधीयते। अथ ऐषमः कौमुदीमहोत्सवो महाकवेर्भासस्य रूपकाणि विषयीकृत्य समायोजितः। एतस्मिन् महोत्सवे एकादशभासरूपकाणां चित्ताकर्षकाः रम्योज्ज्वलाः प्रस्तुतयः प्रातिभज्योतिषा विद्योतितैः छात्रैः प्रस्तुताः। यत्र च –

**शुभ्रा शङ्करविग्रहा ग्रहगणैः सर्वैः शुभैः संयुता**
**भव्यैर्नाट्यकलाकलापमहितैस्तौर्यत्रिकैर्दीपिता।**
**सर्वा संस्कृतमाधुरीं रसमयं विश्वं दधानाऽद्भुतं**
**नित्यानन्दयुता महोत्सवमयी विद्योतिता कौमुदी॥**
**भासाऽर्कप्रतिमैर्गुणैरनुपमैर्भासस्य तैः रूपकैः**
**साकल्येन दिनत्रयेण युगपद् रङ्गे प्रयोगं गतैः।**
**विद्वद्भिर्विबुधोपमैश्च कपिलावात्स्यायनाद्यैर्बुधैः**
**युक्ता चापि तथैव रामकरणैर्विद्योतिता कौमुदी॥**




अखिलभारतीयसंस्कृतनाट्योत्सवे भाषमाणः कुलपतिः राधावल्लभत्रिपाठी मञ्चे (वामतः) पी.एन.शास्त्री, एम.एस. तिवारी, कुसुम भूरिया, रत्नमोहनझाः च।

मुक्तस्वाध्यायपीठस्य स्थापनां विधाय सम्प्रति संस्थानं संस्कृतशिक्षां भारतीयशास्त्रपरम्परां सर्वजनसुलभां विधातुं सन्नद्धं वरीवर्त्यते। तथैव संस्कृतस्य अन्याभिः भारतीयभाषाभिः तासां साहित्येन च सम्बन्धसूत्राणि प्रगुणयितुमपि नानाविधाः प्रकल्पा प्रवर्तिताः। विशिष्य पालि-प्राकृतयोः साहित्यानुसन्धाने अनया धिया प्रकाशनानां सङ्गोष्ठीनां च शृङ्खलाः वितन्यन्ते। विविधभाषाणां विकासेन वाग्देवतायाः समर्चा विदधानैरस्माभिरेतदेवाशास्यते–

**मङ्गलमूर्तिः सततं वितरतु भद्रं परम्पराऽस्माकम्।**
**पालि-प्राकृत-संस्कृत-भाषासङ्गमसरस्वतीव॥**




संस्थानस्य स्थापनादिवससमारोहावसरे रेवाप्रसादद्विवेदिनं पण्डितराजपुरस्कारेण सम्मानयन्तः विद्वांसः।

संस्कृतवार्ताया अङ्कोऽयं नववर्षारम्भसमये प्रकाशमेति। सर्वान् सहृदयान् संस्कृतवार्ताहरान् संस्कृतवार्ताविज्ञान् नववर्षारम्भे समायोज्यमानायां विश्वसंस्कृतपुस्तकमेलायां समागतांश्च पण्डितान् छात्रान् शुभकामनयाऽनया सम्भावयामः –

**आशाः सञ्जनयन् जनस्य हृदयेष्वाशासु चाशासु वै**
**विश्वासं जनतन्त्ररीतिषु दृढं पुष्णंश्च पूषा यथा।**
**क्षेत्रेषु प्रथयंश्च शस्यनिवहैः स्वर्णप्रभामुज्ज्वलां**
**भूयाद् भारतभूतये भयहरः संवत्सरो नूतनः॥**

*–राधावल्लभः त्रिपाठी*




कौमुदीमहोत्सवस्य पुरस्कारवितरणसमारोहे कुलपतिना समं नाट्यविशारदाः

**मुख्यपरामर्शदाता**

आचार्यः राधावल्लभः त्रिपाठी
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**

आचार्यः रामानुजदेवनाथः, नवदेहली
प्रा. जि. गङ्गन्ना, पुरी
प्रा. विश्वमूर्तिशास्त्री, जम्मू
प्रा. आजादमिश्रः, भोपालम्
प्रा. के.टी. माधवन्, गुरुवायूरु
प्रा. अर्कनाथचौधरी, जयपुरम्
प्रा. ए.पि. सच्चिदानन्दः, शृङ्गेरी
प्रा. सुरेन्द्रझाः, लखनऊ
प्रा. एम्.ए. बाबुः, मुम्बई
प्रा. प्रकाशपाण्डेयः, इलाहाबादम्
प्रा. के.वी. सुब्बारायुडु, गरली

**सम्पादकमण्डलम्**

डॉ. शुक्ला मुखर्जी
डॉ. रत्नमोहनझाः
कू. वेङ्कटेशमूर्तिः
प्रफुल्लगडपालः


'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**


# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्
ISSN : 975

प्रकाशकः
**राष्ट्रियसंस्कृतसंस्थानम्**
(मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058
011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in


## प्रतिवार्ता



गतवर्षेभ्यः राष्ट्रियसंस्कृतसंस्थानतः प्रकाशितकलेवरेण आरब्धेयं संस्कृत-वार्ताख्या त्रैमासिकी संस्कृतपत्रिका मया नियमितरूपेण लभ्यते। पत्रिकायामस्यां संस्थानस्य तत्तत्परिसरेषु प्रवर्तमानानां कार्यक्रमाणां भविष्यमाणानां च क्रियाकलापानां प्रकाशितपरिचयं प्राप्य नूनं संस्कृतस्य तत्तत्प्रगत्या संस्कृतस्य वैश्विकपरिदृश्यं क्रमेण प्रगुणीभवतीति सुतरामहं प्रत्येमि। कतिपयवर्षेभ्यः संस्थानेन संस्कृतस्य यः व्यापकः सर्वविधः प्रसारः विविधमाध्यमैः सम्पादितः सम्पद्यमानश्चास्ति, तद् विज्ञाय साधुवादैः कार्तज्ञ्यैश्च सभाजयामि संस्थानाधिकारिणः कर्मचारिणश्चेति।

**भागीरथिनन्दः**, सहयोगि-आचार्यः (साहित्यम्)
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

## ई-पाठ्याधारिता कार्यशाला सम्पन्ना

राष्ट्रियसंस्कृतसंस्थानेन देशस्य विविधाभिः संस्थाभिः विद्वद्भिश्च सह मिलित्वा ई-ग्रन्थालयसम्बद्धां काञ्चिद् विशिष्टां कार्यनीतिं निर्मातुं १३.१२.२०१० दिनाङ्के संस्थानकुलपतेः आचार्यराधावल्लभत्रिपाठिनः आध्यक्ष्ये सम्मेलनकक्षे एका कार्यशाला आयोजिता। प्राच्यग्रन्थानाम् आधुनिकतकनीकीमाध्यमेन नूतनशैल्या प्रस्तुतिः, संस्कृतजगति तकनीकीसाधनानां प्रयोगः, ई-ग्रन्थालयः चेत्यादिविषयेषु अस्यां कार्यशालायां चिन्तनं जातम्। कार्यशालायामस्यां संयुक्तराष्ट्र-अमेरिकास्थ-ब्राऊनविश्वविद्यालयस्य प्राच्यविभागस्य अध्यापकेन आचार्येण पीटर् एम्. शार्फ-महोदयेन महाभारतीय-रामोपाख्यान-मुपादाय सङ्गणकीयैः तकनीकीप्रयोगैः सह स्वनिर्मितं पाठ्यं दर्शितं व्याख्यानं च व्यधायि।

**सङ्गणकीय-संस्कृतभाषाविज्ञानमाधारीकृत्य ई-पाठ्यस्य कार्यनीतिः उपनिबद्धा**



कार्यशालायाम् अम्बाकुलकर्णी सम्मानयन् कुलपतिः राधावल्लभत्रिपाठी (पृष्ठे) पीटर् एम्. शार्फ्

हैदराबादकेन्द्रीयविश्वविद्यालयस्य संस्कृत-विभागाध्यक्षा आचार्या अम्बाकुलकर्णी राष्ट्रियसंस्कृतसंस्थानेन निर्मितसंक्षेप-रामायणमाधारीकृत्य विशिष्टान् प्रयोगान् दर्शयन्ती कस्यचित् पाठ्यांशस्य अन्वयः अनुवादो वा साफ्ट्वेयरमाध्यमेन कथं कर्तव्य इति प्रत्यपादयत्। 'राष्ट्रियसंस्कृतसंस्थानस्य महतां संसाधनानाम् उपयोगः सङ्गणकीय-भाषिकप्रयोगाणां कृते भवितुमर्हति' इत्यपि सा अकथयत्। नवदेहलीस्थजवाहर-लालनेहरूविश्वविद्यालयस्य विशिष्ट-संस्कृताध्ययनकेन्द्रस्य अध्यापकः डा. गिरीशनाथझाः राष्ट्रियसंस्कृतसंस्थानस्य परिसरीयाणां संस्कृतच्छात्राणाम्, अध्यापकानां, सङ्गणकप्राध्यापकानाम् ई-पाठ्यटङ्ककानां च प्रशिक्षणं स्यादिति विशदं प्रत्यपादयत्। संस्थानकुलपतिः प्रशिक्षणस्यास्य सज्जतां विधातुं सम्बद्धान् निर्दिष्टवान्। चेन्नईस्थ-अन्नाविश्वविद्यालयस्य प्रवीणप्रलयङ्करोऽपि कल्पसम्बद्धान् ग्रन्थान् स्वीकृत्य कमपि विशिष्टं प्रयोगं प्रदर्शितवान्। कार्यशालायामस्यां संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी संस्कृतविद्यायां सङ्गणकीयानां प्रयोगानां महत्तां प्रतिपादयन् संस्थानस्य ई-ग्रन्थालये ६०० ग्रन्थाः प्रक्षेपिताः इति संसूचयत्। भाविनि काले संस्थानं सङ्गणकीयभाषिकप्रयोगेषु विशिष्टां भूमिकां वक्ष्यति इति भावं च सः प्राकाशयत्। संस्थानकुलसचिवः रामानुजदेवनाथन् कार्यक्रमान्ते धन्यवादज्ञापनमकरोत्।



कार्यशालायां समुपस्थिताः विद्वांसः




कौमुदीमहोत्सवं समुद्घाटयन्ती कपिला वात्स्यायन (पृष्ठे) रामानुजदेवनाथन्, राधावल्लभत्रिपाठी च

## समायोजितः कौमुदीमहोत्सवः

राष्ट्रियसंस्कृतसंस्थानेन ऐषमः अष्टमः कौमुदीमहोत्सवः (अन्तःपरिसरीया संस्कृतनाट्यस्पर्धा) राजधान्यां नवदेहल्यां लिटिल्-थियेटर्-ग्रुप् ( एल्. टी. जी.) इति प्रेक्षागृहे २५. १०.२०१० तः २७.१०.२०१० पर्यन्तं कैश्चिद् विशिष्टप्रयोगैः सह समायोजितः। अत्रेदं स्मारणीयं वर्तते यद् गतवर्षे कालिदासप्रणीतस्य अभिज्ञानशाकुन्तलस्य सम्पूर्णस्यापि नाटकस्य सप्त अङ्कानां नाट्यप्रस्तुतयः संस्थानपरिसरच्छात्रैः विहिताः आसन्। तथैवास्मिन् वर्षे कश्चन अपरनाट्यप्रयोगः नाट्यस्पर्धायामस्यां प्रयुक्तः। २०१० तमो वर्षोऽयं भासरूपकपाण्डुलिपिपुनराविष्कारशताब्दी-वर्षरूपेण आचर्यते, अतोऽस्मिन् पर्याये महाकवेः भासस्य स्मृतौ सम्माने च भासरूपकाणामेव प्रस्तुतयः स्युः इति निर्णयः सर्वथा प्रासङ्गिक एव। कौमुदीमहोत्सवेऽस्मिन् भासस्य ११ रूपकाणि प्रदर्शितानि अभवन्। एतेषां रूपकाणां दर्शनं निश्चयेन सहृदयानां कृते मोदाय अकल्पत।

कौमुदीमहोत्सवस्य आरम्भदिने २५.१०.२०१० दिनाङ्के उद्घाटनसमारोहे संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी स्वागतभाषणमकरोत्। 'विगतवर्षेषु समाचरितेषु सप्त-कौमुदीमहोत्सवेषु आहत्य ७५ संस्कृतरूपकाणि मञ्चितानि अभवन्' इत्येतं विषयं सः प्रख्यापितवान्। नाट्यशास्त्रप्रणेतुः भरतमुनेः यशोगानं कुर्वन् सः भासस्य महत्तां प्राकाशयत्। मुख्यातिथिपदमलङ्कुर्वती श्रीमती कपिला वात्स्यायन महोदया (राज्यसभासदस्या, अध्यक्षा च आई. आई. सी. एशिया प्रोजेक्ट्) गुरुपरम्परां प्रख्यापयन्ती संस्कृतशास्त्राणां महत्त्वं प्राकटयत्। संस्कृतरूपकाणां प्रदर्शनात्मकमेतं कार्यक्रमं सा अत्यन्तं प्राशंसत्। अवसरेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य वार्तापत्रिकायाः 'संस्कृतवार्ता'याः नवमाङ्कोऽपि लोकायार्पितोऽभवत्। अनन्तरं संस्थानकुलसचिवः आचार्यः रामानुजदेवनाथः सर्वेभ्यः धन्यवादज्ञापनं व्याहरत्।

समनन्तरमेव भोपालपरिसरच्छात्रैः पूर्वरङ्गः प्रस्तुतः। ततश्च केरलस्थगुरुवायूरुपरिसरच्छात्रैः कर्णभारस्य रूपकस्य भव्या प्रस्तुतिः प्रदर्शिता। एतां प्रस्तुतिं दृष्ट्वा प्रभाविता श्रीमती डा. एस. आर. लीला ५०० रूप्यकाणां पारितोषिकं छात्रेभ्यः दत्तवती। जयपुरतः समायाताः छात्राः मध्यमव्यायोगं नटितवन्तः। तदनु पञ्चरात्रस्य रूपकस्य प्रस्तुतिः मुम्बई-परिसरेण सम्पादिता। अस्मिन्नैव दिने प्रसारभारतीत्याख्यायाः संस्थायाः दूरदर्शनाभिलेखागारस्य निदेशिकया कमलिनीदत्तया निर्देशितस्य आमन्त्रितरूपकस्य ऊरुभङ्गस्य सुष्ठु-प्रस्तुतिः अपि प्रदर्शिता अभवत्।

कौमुदीमहोत्सवस्यास्य द्वितीये दिने २६.१०.२०१० दिनाङ्के भोपालपरिसरच्छात्रैः प्रतिज्ञायौगन्धरायणं समीचीनतया प्रदर्शितम्। अनन्तरं गङ्गानाथझापरिसरः (इलाहाबाद्) दूतवाक्यं, गरलीपरिसरः दरिद्रचारुदत्तं, राजीवगान्धीपरिसरः (शृङ्गेरी) च स्वप्नवासवदत्तं प्रदर्शितवन्तः। दरिद्रचारुदत्तरूपकस्य पात्राणि छात्रीभिः एव विहितानि इतीदमत्र किञ्चिद् वैशिष्ट्यम् आसीत्। स्वप्नवासवदत्तमिति रूपकस्य प्रस्तुतिः सहृदयैः बहु प्रशंसिता। नाट्यविशेषज्ञाः अपि तदा तदा कुशीलवानां निर्देशनमकुर्वन्।




स्वागतभाषणं कुर्वन् कुलपतिः राधावल्लभत्रिपाठी

कौमुदीमहोत्सवस्य तृतीये अन्तिमे च दिने २७.१०.२०१० दिनाङ्के पुरीपरिसरच्छात्राः बालचरितम् अतीव सुन्दरतया प्रदर्शितवन्तः। अविमारकमिति रूपकं लखनऊपरिसरेण अभिनीतम्। सर्वान्ते च जम्मूकश्मीरस्थ-श्रीरणवीरपरिसरेण प्रतिमानाटकं प्रदर्शितम्। कौमुदीमहोत्सवस्यास्य समापनसमारोहे संस्थानकुलपतिना आचार्यराधावल्लभत्रिपाठिना अतिथीनां निर्णायकानां च सत्कारः विहितः। तदनन्तरं परिसरप्राचार्याणां तत्तन्नाट्यनिर्देशकानां च सत्कारः कुलसचिवप्रमुखसंस्थानसदस्यैः सम्पादितः। कुलसचिवः आचार्यरामानुजदेवनाथन् स्वागतभाषणे सर्वेभ्यः कृतज्ञतां न्यवेदयत्। पुरीस्थ-सदाशिवपरिसरप्राचार्यः जी. गङ्गन्ना, भोपालपरिसरप्राचार्यः आज़ादमिश्रश्च कौमुदीमहोत्सवस्य विषये सुखदं स्वाभिप्रायं प्रकटितवन्तौ। संस्थानस्य आद्यनिदेशकः आचार्यः रामकरणशर्मा संस्थानस्य अभ्युत्थानाय शुभाशयान् प्रकटयन् शुभाशीर्वादैः सार्धं महोत्सवस्य सफलतामभिनन्दन् हार्दिकं सन्तोषमभिव्यक्तवान्। मुख्यातिथित्वेन समाहूतः अहमदाबादस्थ-सोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतिः आचार्यः पङ्कज एल्. जानी स्वाभिभाषणेन संस्कृतज्ञेषु नूतनोत्साहस्य सञ्चारम् अकरोत्। संस्थान-कुलपतिः आचार्यराधावल्लभत्रिपाठी अध्यक्षीयं भाषणं कृतवान्। मुक्तस्वाध्यायपीठस्य निदेशकः डा. वाई. एस. रमेशः धन्यवादं ज्ञापितवान्। चिरप्रतीक्षितपुरस्कारवितरणपरिणामान् ज्ञात्वा सर्वेऽपि अन्तेवासिनः मुदिताः जाताः। पुरस्कारवितरणसमारोहानन्तरं सामूहिकराष्ट्रगानेन कौमुदीमहोत्सवोऽयं समाप्तिं यातः। निश्चप्रचं कलासाधनायां कामपि पराकाष्ठां स्पृशन् कौमुदीमहोत्सवोऽयं चिरस्मरणीयो जातः।




संस्कृतवार्तायाः पूर्वतनाङ्कस्य लोकार्पणदृश्यम्

मुख्यालयवार्ता

कौमुदीमहोत्सवे प्रथमादिस्थानभाजः परिसरनामानि इत्थं वर्तन्ते–

| स्थानम् | रूपकनाम | परिसरनाम |
|---|---|---|
| प्रथमम् | **कर्णभारम्** | गुरुवायूरु-परिसरः |
| | **स्वप्नवासवदत्तम्** | श्रीराजीवगान्धीपरिसरः, शृङ्गेरी |
| द्वितीयम् | **बालचरितम्** | श्रीसदाशिवपरिसरः, पुरी |
| | **मध्यमव्यायोगः** | जयपुर-परिसरः |
| तृतीयम् | **अविमारकम्** | लखनऊ-परिसरः |
| | **प्रतिज्ञायौगन्धरायणम्** | भोपालपरिसरः |



कर्णभारस्य किञ्चिद् दृश्यम्

जम्मूस्थ-श्रीरणवीरपरिसरेण प्रस्तुतं **प्रतिमानाटकं** विशेषपुरस्कारपात्रं सञ्जातम्।

सान्त्वनपुरस्कारेण एतानि रूपकाणि पुरस्कारार्हाणि अभवन्–

* **पञ्चरात्रम्** — के. जे. सोमैय्या संस्कृतविद्यापीठम्, मुम्बई
* **दूतवाक्यम्** — गङ्गानाथझा-परिसरः, इलाहाबाद्
* **दरिद्रचारुदत्तम्** — गरलीपरिसरः, गरली



स्वप्नवासवदत्तस्य किञ्चिद् दृश्यम्

सर्वश्रेष्ठ–अभिनेतृ–अभिनेत्री–पुरस्कारभाजः –

| पुरस्कारः | छात्रनाम | रूपकनाम परिसरनाम च |
|---|---|---|
| सर्वोत्तमः अभिनेता | **रवीशहेगडे** (विदूषकः) | स्वप्नवासवदत्तम्, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी |
| | **निपिन् पी. यु.** (कर्णः) | कर्णभारम्, गुरुवायूरुपरिसरः |
| सर्वोत्तमा अभिनेत्री | **सौम्या हेगडे** (वासवदत्ता) | स्वप्नवासवदत्तम्, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी |
| | **स्वाति पी. राज** (कुन्ती) | कर्णभारम्, गुरुवायूरुपरिसरः |



बालचरितस्य किञ्चिद् दृश्यम्

प्रत्येकं रूपके प्रथम-द्वितीय-तृतीयक्रमेण पुरस्कारभाजः कुशीलवाः –

| रूपकनाम | परिसरनाम | प्रथमपुरस्कारः | द्वितीयपुरस्कारः | तृतीयपुरस्कारः |
|---|---|---|---|---|
| कर्णभारम् | गुरुवायूरुपरिसरः | निपिन् पि. यु. (कर्णः) | स्वाति पि. राज् (कुन्ती) | प्रजीष एन. एस. (परशुरामः) |
| मध्यमव्यायोगः | जयपुरपरिसरः | दीपकभारद्वाजः (घटोत्कचः) | पवनशर्मा (ब्राह्मणः) | सङ्कल्पमिश्रः (भीमः) |
| पञ्चरात्रम् | के. जे. सोमय्यासंस्कृत-विद्यापीठम्, मुम्बई | गोपालकुमारमिश्रः (अर्जुनः बृहन्नलश्च) | खुशेन्द्र उपाध्यायः (शकुनिः) | भूपेन्द्रमिश्रः (द्रोणः) |
| प्रतिज्ञायौगन्धरायणम् | भोपालपरिसरः | मयङ्कमिश्रः (यौगन्धरायणः) | मनोजमिश्रः (कञ्चुकीयः) | अनुपमगर्गः (उदयनः) |
| दूतवाक्यम् | गङ्गानाथझापरिसरः, इलाहाबाद् | दयाशङ्करतिवारी (दुर्योधनः) | कौशलेन्द्रकुमारतिवारी (वासुदेवः) | रामचन्द्रद्विवेदी (सुदर्शनः) |
| दरिद्रचारुदत्तम् | गरलीपरिसरः | शालिनी देवी (विदूषकः) | सन्तोष (गणिका) | प्रियङ्का (रदनिका) |
| स्वप्नवासवदत्तम् | श्रीराजीवगान्धीपरिसरः, शृङ्गेरी | रवीशहेगडे (विदूषकः) | सौम्याहेगडे (वासवदत्ता) | विघ्नेश्वरः के. एस. (उदयनः/वत्सराजः) |
| बालचरितम् | श्रीसदाशिवपरिसरः, पुरी | कवितासाहू (देवकी) | सुव्रतकुमारषडङ्गी (सूत्रधारः, दामोदरश्च) | लक्ष्मण पाढी (अरिष्टर्षभः, कालीयश्च) |
| अविमारकम् | लखनऊपरिसरः | पञ्चदेवपाण्डेयः (विदूषकः) | लक्ष्मीकान्तपाठकः (अविमारकः) | रेणूवत्स (नलिनिका) |
| प्रतिमानाटकम् | श्रीरणवीरपरिसरः, जम्मू | कपिलदेवः (दशरथः) | पुरुषोत्तमः (भरतः) | ऋषिकुमारः (रावणः) |

कौमुदीमहोत्सवेऽस्मिन् निर्णायकत्वेन समागत्य कार्यक्रमममुम् अलङ्कृतवन्तः नाट्यकलायाः विशिष्टाः विद्वांसः –

१. गौतमभाईपटेलः, २. एस. आर. लीला, ३. सूर्यमोहनकुलश्रेष्ठः, ४. शर्मिलाबागची, ५. विधुखरे, ६. बलदेवानन्दसागरः च

**परिसरशः सर्वपरिसरीयनाट्यनिर्देशकाः**

(१) गुरुवायूरुपरिसरः – डा. सुब्रह्मण्यशर्मा
(२) जयपुरपरिसरः – डा. रमाकान्तपाण्डेयः
(३) के. जे. सोमैय्यासं.वि.पी., मुम्बई – डा. आर. गायत्री मुरलीकृष्णः
(४) भोपालपरिसरः – डा. सुज्ञानकुमारमोहान्ती
(५) गङ्गानाथझापरिसरः, इलाहाबाद् – डा. जनार्दनप्रसादपाण्डेयः 'मणिः'
(६) गरलीपरिसरः – डा. विजयपालशास्त्री
डा. किशोरकुमारदलाई च
(७) श्रीराजीवगान्धीपरिसरः, शृङ्गेरी – डा. राघवेन्द्रभट्टः
(८) श्रीसदाशिवपरिसरः, पुरी – डा. शम्भुनाथमहालिकः
(९) लखनऊपरिसरः – डा. रामलखनपाण्डेयः डा. धनीन्द्रझा च
(१०) श्रीरणवीरपरिसरः, जम्मू – डा. जयप्रकाशनारायणः



मध्यमव्यायोगस्य किञ्चिद् दृश्यम्



अविमारकस्य किञ्चिद् दृश्यम्



नाटकानि प्रेक्षन्तः सुधियः प्रेक्षकाः



ऊरुभङ्गस्य एकं दृश्यम्



प्रतिज्ञायौगन्धरायणस्य किञ्चिद् दृश्यम्



प्रतिमानाटकम्



पञ्चरात्रम्



दूतवाक्यम्



दरिद्रचारुदत्तम्

# दृष्टः कश्चन युवमहोत्सवः....




युवमहोत्सवस्य उद्घाटनावसरे सभां सम्बोधयन्ती अनिताभटनागरजैन। मञ्चे दृश्यन्ते विद्वांसः

राष्ट्रियसंस्कृतसंस्थानं, मानितविश्वविद्यालयः दिसम्बरमासस्य २६-२९, दिनाङ्केषु केरलराज्यस्य त्रिश्शूरमण्डले गुरुवायूर्-परिसरे तृतीयं युवमहोत्सवं समायोजयत्। केरलस्य नितान्तप्राकृतिकसौन्दर्ययुते कैरली-पारम्परिकसांस्कृतिके च वातावरणे अस्य युवमहोत्सवस्य आयोजनं सर्वेषां कृते मोदाय अकल्पत। देशस्य विविधराज्यस्थितेभ्यः परिसरेभ्यः आहत्य ५४० छात्राः अस्मिन् उत्सवे शैक्षिक-कला-क्रीडा इत्यनेन प्रकारेण विभिन्नस्पर्धासु भागमवहन्।

२६.१२.२०१० दिनाङ्के अस्य युवमहोत्सवस्य भव्या शोभायात्रा अपराह्णे ३.३० वादने प्रचलिता। एतां शोभायात्रां वीक्ष्य गुरुवायूर्-पौरेषु काचित् आत्मिकी प्रसन्नता जागरिताऽभवत्। तत्तत्परिसरीयाः प्रतिभागिनः तत्रत्यप्रादेशिकीं संस्कृतिं गणवेषाभां च अत्र प्रकाशयन्तः लघुभारतस्य साक्षात् चित्रमेव उपस्थापितवन्तः। सायं ५.०० वादने परिसरस्य विस्तृते प्राङ्गणे युवमहोत्सवस्यास्य उद्घाटनसमारोहः समायोजितः आसीत्। उद्घाटनसमारोहेऽस्मिन् मानवसंसाधनविकासमन्त्रालये भाषाणां संयुक्तसचिवा डा. (श्रीमती) अनीता भटनागरजैनवर्या मुख्यातिथित्वेन, कविवरेण्यः आचार्यः अभिराजराजेन्द्रमिश्रः सारस्वतातिथित्वेन च उपस्थितौ आस्ताम्। समारोहस्यास्य आध्यक्ष्यं संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी निरवहत्। मञ्चे तावत् संस्थानकुलसचिवः आचार्यः रामानुजदेवनाथन्, युवमहोत्सवस्यास्य मुख्यसंयोजकः गुरुवायूर्-परिसरप्राचार्यः के.टी. माधवन् अपि च परियोजना-अधिकारी डा. शुक्ला मुखर्जी उपस्थिता आसन्। परिसरप्राचार्यः के.टी. माधवन् सर्वेभ्यः स्वागतं व्याहृत्य छात्राणां कृते हार्दिकीं शुभकामनां प्राकटयत्। डा. (श्रीमती) अनीताभटनागरजैन शोभायात्रां प्रशंसन्ती संस्कृतच्छात्राणां कृते एतादृशानाम् आयोजनानां महत्त्वं प्राकाशयत्। विश्वविद्यालयेऽस्मिन् संस्कृतच्छात्राणां सर्वाङ्गीणो विकासः स्यादिति सा भृशं प्रत्यपादयत्। आध्यक्ष्यं वहता संस्थानकुलपतिनाऽपि अस्य कार्यक्रमस्य महत्त्वं प्रकटीकृतम्। कुलसचिवः आचार्यः रामानुजदेवनाथन् धन्यवादज्ञापनं विहितवान्। इत्येवम् अस्य युवमहोत्सवस्य पारम्परिकरूपेण विधिवत् उद्घाटनसमारोहः सुसम्पद्यत।




युवमहोत्सवस्य किञ्चिद् दृश्यम्



युवमहोत्सवस्य किञ्चिद् दृश्यम्

२७-२९ दिनाङ्केषु विविधाः शैक्षणिक-कला-क्रीडास्पर्धाः सुसम्पन्नाः। २९.१२.२०१० दिनाङ्के गुरुवायूर्-परिसरस्य मुख्यसभाभवने सायं ६.०० वादने अस्य युवमहोत्सवस्य समापनसमारोहः अजायत। अस्मिन् समारोहे आचार्यः रमाकान्तशुक्लः मुख्यातिथ्यं, राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी च आध्यक्ष्यं निर्व्यूढवन्तौ। मञ्चे कुलसचिवः आचार्यः रामानुजदेवनाथन्, गुरुवायूर्-परिसरप्राचार्यः के.टी. माधवन्, परियोजना-अधिकारी डा. शुक्ला मुखर्जी च उपस्थिता आसन्। अस्यैव कार्यक्रमस्य अङ्गतया ऐषमः कामनवेल्थक्रीडायां रजतपदकविजेत्री सुश्री पी. के. प्रजूषा अपि कुलपतिना सम्मानिता। समापनसमारोहेऽस्मिन् गुरुवायूरु-परिसरच्छात्रैः सुसुन्दरं प्रदर्शनं कृतम्। वन्दे मातरम् इति गीतमाध्यमेन प्रदर्शितां प्रस्तुतिं वीक्ष्य प्रेक्षकाः मन्त्रमुग्धाः अजायन्त। कार्यक्रमसञ्चालनं मुक्तस्वाध्यायपीठस्य निदेशकः डा. वाई. एस. रमेशः मुक्तस्वाध्यायपीठस्य संयोजकः डा. रत्नमोहनझा च अकुरुताम्।



किञ्चन स्पर्धादृश्यम्



उद्घाटनकार्यक्रमस्य किञ्चन दृश्यम्

मुख्यालयवार्ता

युवमहोत्सवे पुरस्कारभाजां नामानि (प्रथम-द्वितीय-तृतीयक्रमेण)-

**क. शैक्षिकस्पर्धा**

1. संस्कृतसुभाषितकण्ठपाठः - सिन्धु के. कुमारः, (रेणु शर्मा सौदामिनी च), सुब्रह्मण्यः एच.
2. वादविवादस्पर्धा - मुकेशकुमारः, श्यामा के. एस., भुसचिन्तामणप्रकाशः
3. स्फूर्तिस्पर्धा - दीपककुमार-मनीषकुमारौ, प्रियङ्कागर्ग-विनोदकुमारशर्माणौ, राघवेन्द्र पि. अरोल्लि-बालचन्द्रभट्टौ
4. साहित्यरचना - विश्वनाथहेगडे, आशुतोषतिवारी, शेषाद्रि आर.
5. सङ्गणकीयसंस्कृतस्पर्धा - कुलदीपभट्टः, जानकीसरनः, (पुरूषोत्तमः स्वाति पि. राज च)

**ख. चित्रस्पर्धा**

1. आशुचित्रणम् - श्रुती के. वि., नर्मदा एम्. एम्., ईश्वरमूर्तिः जि. बि.
2. व्यङ्ग्यचित्रम् - मानसरञ्जनसाहू, सुजाता बेहेरा, जितेन्द्रकुमारपराशरः
3. भित्तिपत्रकम् - मानसरञ्जनसाहू, नर्मदा एम.एम., ज्योतिरञ्जननन्दः
4. रङ्गवल्ली - अरूणः ए.जि., प्रतीक्षा सोनी, लिलि बराल्

**ग. सांस्कृतिकस्पर्धा**

1. एककसंस्कृतगीतम् - विन्ध्या बि. एम., सङ्गीता महारणा, फिरोजखान
2. एककशास्त्रीयगायनम् - सङ्गीता महारणा, फिरोजखान, अमरेश्वर-नायकः
3. एककशास्त्रीयवादनम् - अभिशेखरशर्मा, भूपेशपुरोहितः, हेमन्तजोशी
4. एककशास्त्रीयनृत्यम् - प्रतीक्षासोनी, सुश्री भाग्यश्रीश्रीचन्दन, (मनोज मिश्रा गायत्री राउतराय च)
5. एकपात्राभिनयः - निपिन पि. यू., रवीशहेगडे, मयङ्कमिश्रः
6. सङ्घनृत्यम् (Group Dance) (बालिकानां) - भोपाल-जयपुरपरिसरौ, गुरुवायूरपरिसरः, जम्मू-शृङ्गेरीपरिसरौ

**घ. क्रीडास्पर्धा**

1. योगासनप्रदर्शनम् - विविधपरिसरीयच्छात्राः
2. 100 मीटरधावनम् (बालकानां) - प्रमोदकुमारमहापात्रः, भूपेन्द्रसिंहः, बिक्रमकिशनः
3. 100 मीटरधावनम् (बालिकानां) - रजनी भट्टः बी.एस., थूशरा के. हेगडे, हिबा वी. आर.
4. 200 मीटरधावनम् (बालकानां) - प्रमोदकुमारमहापात्रः, भूपेन्द्रसिंहः, संदीपकुमारः
5. 200 मीटरधावनम् (बालिकानां) - शशिकला भट्ट, रञ्जनी भट्ट बी.एस., हिबा वी. आर.
6. 400 मीटरधावनम् (बालकानां) - संदीपकुमारः, जगन्नाथ आर्या, प्रियब्रतप्रधानः
7. 400 मीटरधावनम् (बालिकानां) - ज्योति सिंह, मीना गोस्वामी, आशा गोपाल हेगडे
8. 800 मीटरधावनम् (बालकानां)-विक्रमः, रणवीरचौधरी, शैतानरामः
9. 1500 मीटरधावनम् (बालकानां) - अजमेशः, आदित्यपात्रः, योगेशकुमारदाधीचः
10. दीर्घकूर्दनम् (Long Jump) (बालकानां) - प्रमोदकुमारमहापात्रः, भूपेन्द्रसिंहः, बिक्रमकिशनः
11. दीर्घकूर्दनम् (Long Jump) (बालिकानां) - रञ्जनी भट्टः बी.एस., अञ्जली, रेणुका
12. उच्चकूर्दनम् (High Jump) (बालकानां) - प्रमोदकुमारमहापात्रः, निरञ्जनभट्टः, रणवीरचौधरी
13. उच्चकूर्दनम् (High Jump) (बालिकानां) - अस्वथि पी.एम., रञ्जनी भट्ट बी.एस., लक्ष्मीप्रिया मानसिंह
14. गोलकक्षेपणम् (Shot put) (बालकानां)- सारथचन्द्रन्, रवीन्द्र सत्यवती, प्रवीणकुमारः
15. गोलकक्षेपणम् (Shot put) (बालिकानां) - श्रीरञ्जनी के., शान्तला राव के.वी., झरना दास
16. चक्रक्षेपणम् (Discus throw) (बालकानां)- राधामोहनशर्मा, प्रवीणकुमारः, सारथचन्द्रन्
17. चक्रक्षेपणम् (Discus throw) (बालिकानां)- शशिकला भट्ट, प्रीति, झरना दास
18. कुन्तक्षेपणम् (Javaline throw) (बालकानां) - धीरजकुमारः, अजीतकावतेकरः, रविजैनः
19. बैडमिण्टन् (Badminton single) (बालकानां) - अरुणशर्मा, राजेशकुमारः
20. बैडमिण्टन्(Badminton single)(बालिकानां)-शारदा, अश्वजय पि.
21. बैडमिण्टन् (Badminton double) (बालकानां) - अरुणशर्म-गणेशदत्तौ, कमलेश्वर-राकेशकुमारौ
22. बैडमिण्टन् (Badminton double) (बालिकानां) - शारदा-रीने, अश्वजय पी. - सजना-अनुजे
23. हस्तकन्दुकम् (Volleyball) (बालकानां)

    **जम्मूपरिसरः (प्र.)** - दीपकशर्मा, मङ्गारामः, मयङ्कः, नवीनचन्दः, पङ्कजशर्मा, संजीवकुमारः, विजयकुमारः, अंकुशशर्मा

    **शृङ्गेरीपरिसरः (द्वि.)** - दीपक एम.एच., कलाधरभट्टः, मधुकेश्वरः, मंजुनाथ जी.बी., पोपुलस्ती प्रधानः, राजेन्द्र एम.बी., सुश्रुथ एस., विघ्नेश्वर के.एस.
24. मल्लयुद्धम् (Wrestling 50 kg) (बालकानां) - रोहितासकुमारः, दीपकुमारः, (कमलकान्तचौबे सुशान्तः च)
25. मल्लयुद्धम् (Wrestling 55 kg) (बालकानां) - अजमेशः, सुनीलकुमारः, (श्यामसुन्दरः योगेशकुमारदाधीचः च)
26. मल्लयुद्धम् (Wrestling 60 kg) (बालकानां) - अनुजकुमारः, जगतारसिंहः, (जगन्नाथ आर्यः सतीशकुमारः च)
27. मल्लयुद्धम् (Wrestling 66 kg) (बालकानां) - उमेशकुमारः, नवीनकुमारः, (राजेश आर्यः कुलदीपसिंहपिलवलः च)
28. मल्लयुद्धम् (Wrestling 74 kg) (बालकानां) - संदीपकुमारः, हरीशकुमारः, (हेमन्तशर्मा सत्यवीरसिंहः च)
29. कबड्डी (Kabaddi) (बालकानां) -

    **लखनऊपरिसरः (प्र.)** - लीलाधरः, नवीनकुमारः, अनुजकुमारः, संदीपकुमारः, उमेशकुमारः, विक्रमशर्मा, सुनीलकुमारः, रामजी उपाध्यायः, प्रकाशचन्द्र आर्यः

    **पुरीपरिसरः (द्वि.)** - सौम्यरञ्जनकरः, चन्द्रध्वजभुई, सौम्यरञ्जनसारङ्गी, राजेन्द्रमिश्रः, सौम्यरञ्जनप्रधानः, गणेश-मल्लिकः, नाबाकिशोरपाण्डा, बिक्रान्तकुमारराणा, रङ्गनाथमिश्रः

30. चतुरङ्गम् (Chess) – हेमन्तसिंहयादवः, मुरलीधरपालीवालः, हर्षदेवः

31. खो-खो (बालिकानां)-शान्तला राव के.वी., मीनाक्षी, हिबा वी.आर.

**युवमहोत्सवे विभिन्नस्पर्धासु सर्वाधिकान् अङ्कान् प्राप्य प्रथम-द्वितीय-तृतीयस्थानभाजः परिसराः -**

1. **श्रीराजीवगान्धीपरिसरः, शृङ्गेरी (विजयवैजयन्ती)**
2. **जयपुरपरिसरः, जयपुरम्**
3. **लखनऊपरिसरः, लखनऊ**






मुख्यालयवार्ता




एम.एस्. तिवारीवर्याय स्मृतिचिह्नं प्रयच्छन् संस्थानकुलपतिः रा.व. त्रिपाठी मञ्चे पी.एन् शास्त्री, कुसुम भूरिया च

## सुसम्पन्नः तृतीयोऽखिलभारतीयसंस्कृतनाट्योत्सवः

संस्कृतनाट्यपरम्परां सुदृढां विधातुं संस्कृतनाट्यरङ्गमञ्चं च विश्वस्मिन्नपि विश्वे प्रसारयितुं राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् अखिलभारतीयसंस्कृतनाट्योत्सवः समाचर्यते। आदौ अयमुत्सवः भोपालस्य भारतभवने मार्च २००९ तमे वर्षे आयोजितः। द्वितीयोऽखिलभारतीयसंस्कृतनाट्योत्सवः गतवर्षे फरवरी-मासि सुकान्त-अकादमी-प्रेक्षागृहे अगरतलानगर्यां च सुसम्पन्नः। अस्यामेव शृङ्खलायाम् अस्मिन् वर्षे अयं दिनत्रयात्मकः तृतीयः अखिलभारतीयसंस्कृतनाट्योत्सवः ०६-०८ दिसम्बर, २०१० मिते काले मध्यप्रदेशस्य सागरस्थ-डा. हरिसिंहगौरविश्वविद्यालयस्य श्रीमन्त-राजमाता-विजयाराजे-सिन्धिया-स्वर्णजयन्ती-सभागारे विश्वविद्यालयसाहाय्येन समायोजितोऽभवत्। त्रिष्वपि दिनेषु कार्यक्रमाः अपराह्ने ४.०० वादने समारब्धाः। ०६.१२.२०१० दिनाङ्के प्रमुदिते वातावरणे नाट्योत्सवस्यास्य विधिवत् शुभारम्भो जातः।

नाट्योत्सवस्य उद्घाटनसमारोहे मुख्यातिथित्वेन समाहूतः डॉ. हरिसिंहगौरविश्वविद्यालयस्य कार्यवाह-कुलपतिः आचार्यः एम. एस. तिवारी संस्कृतस्य संस्कृतनाट्यपरम्परायाश्च महत्तां प्रख्यापयन् अकथयद्यत्, 'सर्वेष्वपि संस्कृतनाटकेषु अवश्यं कश्चन मूल्यपरकसन्देशो निहितो भवति, सः खलु राष्ट्रस्य समाजस्य अभ्युत्थानाय महतीं भूमिकां वहति। अतः संस्कृतनाटकानां प्रचारो भवितव्यः' इति। सारस्वतातिथिः आचार्यः परमेश्वरनारायणशास्त्री (निदेशकः, कालिदास-अकादमी, उज्जयिनी, मध्यप्रदेशः) 'मानवीयसद्गुणानां विकासे संस्कृतनाटकानाम् अपरिहार्यता' इति विषयकेन्द्रितं स्वाभिमतं प्रकटितवान्। कार्यक्रमस्यास्य अध्यक्षः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी आधुनिकपरिप्रेक्ष्ये संस्कृतनाटकानां माहात्म्यं प्रकटयन् अकथयद्यत्, 'सप्ततितमे दशके संस्कृतनाटकेषु अभिनयन्तो वयं साम्प्रतिकसम्भावनायुतसंस्कृतनाटकपरिदृश्यस्य एतादृशीं कल्पनामपि न कृतवन्तः। तस्मिन् काले समाजे संस्कृतनाटकानां बहु प्रसिद्धिः नासीत् किन्तु सम्प्रति संस्कृतरङ्गपरम्परा विश्वस्मिन्नपि विश्वे अत्यन्तं समादरणीया वर्तते।' सभां सम्बोधयता अनेन महोदयेन संस्कृतनाटकेषु समुज्जलभविष्यस्य सम्भावना स्यादित्यपि आशा प्रकटिता। उद्घाटनसत्रस्य समनन्तरमेव मध्यप्रदेशस्य उज्जयिनीस्थ-कालिदास-अकादमी अभिज्ञानशाकुन्तलनाटकस्य प्रस्तुत्या सहृदयान् आह्लादयत। नाटकस्यास्य प्रस्तुत्यवसरे सप्तवर्षीयस्य सारांशशर्मणः मुखात् धाराप्रवाह-शुद्धसंस्कृतवचांसि आकर्ण्य श्रोतृगणः आनन्दितो जातः।

नाट्योत्सवस्य द्वितीये दिने ०७.१२.२०१० दिनाङ्के सञ्जयद्विवेदिनः सुमधुरगीतेन कार्यक्रमारम्भो जातः। तदनु महाराष्ट्रस्य नागपुरस्थ-संस्कृतभाषाप्रचारिणीसभा 'मोहवनम्' इत्यनेन आधुनिकसंस्कृतरूपकमाध्यमेन 'छात्रावासेषु कुसङ्गतापन्नानां छात्राणां कुस्थितिं, तेषां दुष्टव्यवहाराणां परिणामान् च' उपस्थापयत्। एतद् रूपकानन्तरं डा. गजाननहेगडे दक्षिणभारतीयेषु पारम्परिकनृत्येषु नाट्यशास्त्रस्य प्रभावमधिकृत्य अभिनययुतं व्याख्यानं प्रास्तौत्। संस्कृतभाषाप्रचारिणीसभा पुनरपि 'बण्डुः नाटकं करोति' इति रसपूर्णम् आधुनिकनाटकं प्रादर्शयत्।

तृतीये अन्तिमे च दिने ०८.१२.२०१० दिनाङ्के मध्यप्रदेशस्य भोपालस्थ-नटबुन्देले-संस्था 'भगवदज्जुकीयम्' इति हास्यप्रधान-सामाजिकरूपकस्य बुन्देलीभाषया प्रस्तुतिमकरोत्। तदनु सागरविश्वविद्यालयस्य संस्कृतविभागेन 'मध्यमव्यायोगः' इति रूपकं प्रस्तुतम्। अस्य तृतीयस्य अखिलभारतीयसंस्कृतनाट्योत्सवस्य समापनसमारोहे मुख्यातिथित्वेन सागरविश्वविद्यालयस्य संस्कृतविभागाध्यक्षा आचार्या कुसुमभूरिया, सारस्वतातिथित्वेन उत्तरप्रदेशस्य वाराणसीस्थ-अभिनवगुप्त-अकादम्याः निदेशकः आचार्यः गौतमचटर्जी, विशिष्टातिथित्वेन उज्जयिनीस्थ-कालिदास-अकादम्याः निदेशकः आचार्यः परमेश्वरनारायणशास्त्री, अध्यक्षत्वेन राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी च सभाम् अलङ्कृतवन्तः। आचार्यः गौतमचटर्जी स्वव्याख्यानात्मके उद्बोधने भारतीयकलाविषये भाषणं कुर्वन् 'नाट्यकला समस्तकलाप्रपञ्चे विशिष्टपदमर्हति' इति अकथयत्। कुलपतिः कार्यक्रमाध्यक्षश्च आचार्यराधावल्लभत्रिपाठी अपि स्वाशयं प्राकटयत्। कार्यक्रमस्य सफलसम्पन्नतायाः कृते डा. धर्मेन्द्रकुमारसिंहदेवः सर्वेषां कृते कार्तज्ञ्यं ज्ञापितवान्। डा. रत्नमोहनझा मञ्चसञ्चालनम् अकरोत्।




समापनसमारोहे भाषमाणः संस्थानकुलपतिः राधावल्लभत्रिपाठी, मञ्चे विद्वांसः







# अध्यापकशिक्षायै राष्ट्रियपाठ्यचर्यारूपरेखायाः अभिमुखीकरणकार्यक्रमः सम्पन्नः

अध्यापकशिक्षायै राष्ट्रियपाठ्यचर्यारूपरेखायाः अभिमुखीकरणकार्यक्रमः दिसम्बरमासस्य १५-१६ दिनाङ्कयोः संस्थानस्य अष्टसु परिसरेषु प्रशिक्षणशास्त्रविभागेषु अध्यापनरतानां नियमितानां सहायकाचार्याणां, सहाचार्याणां आचार्याणाञ्च कृते राष्ट्रियसंस्कृतसंस्थानेन आयोजितः। पाठ्यचर्यारूपरेखासन्दर्भे उद्घाटनसत्रेण सह अष्टसु सत्रेषु विचारमन्थनं सम्यग्जायत। अभिमुखीकरणकार्यक्रमस्योद्घाटनसत्रं १५.१२.२०१० दिनाङ्के प्रातः १०.३० वादने भारतशासनस्य पूर्वसांस्कृतिकसचिवस्य, साम्प्रतिकस्य 'न्यूपा'संस्थायाः कुलाधिपतेः च के. के. चक्रवर्तिमहोदयस्य मुख्यातिथित्वे, 'MERI'संस्थानिदेशकस्य आचार्यस्य वाई. एल. ग्रोवरस्य विशिष्टातिथित्वे, संस्थानकुलपतेः राधावल्लभत्रिपाठिनः आध्यक्ष्ये च समारब्धम्। संस्थानकुलसचिवस्य आचार्यरामानुजदेवनाथस्य स्वागतभाषणं मुख्यातिथेः परिचयपुरस्सरं सुसम्पन्नम्। तदनु संस्थानकुलपतिः उपस्थितेभ्यो मुख्यातिथिभ्यो, विशिष्टातिथिभ्यः च पुष्पगुच्छम् ऊर्णोत्तरीयं फलकदम्बकं च दत्त्वा तेषां सत्कारं विहितवान्। सः कार्यक्रमे समुपस्थितेभ्यः सर्वेभ्यः समुद्बोधकेभ्यश्च आचार्यश्रीधरवसिष्ठ-आचार्यरविशङ्करमेनन्-आचार्यहरिकेशसिंह-आचार्यगोपीनाथशर्म-आचार्यमुरलीधरशर्म-आचार्यनागेन्द्रझामहोदयेभ्यः पुष्पगुच्छं प्रदाय तेषामपि स्वागतमकरोत्। ततश्च मुख्यातिथिः के.के. चक्रवर्तिरभाषत। राष्ट्रियाध्यापकशिक्षापरिषदा निर्मितायाः राष्ट्रियपाठ्यचर्यारूपरेखायाः आधारेण प्रशिक्षकाणां गुणवत्ताविकासे संस्कृतशिक्षादृष्ट्या किं करणीयमित्यत्र समेषामुपस्थितानाम् अवधानमाकर्षत्। विशिष्टातिथिरपि मुख्यातिथिभाषणमेव समर्थयन् आत्मनः संस्थाभवने कार्यक्रमायोजनाय हर्षं प्रकटितवान्।

अध्यक्षभाषणे कुलपतिः समेषां स्वागतं व्याहरन् पाठ्यचर्यारूपरेखायाः आवश्यकताविषये NCERT-NCTE इत्यनयोः सन्दर्भे, प्रो. यशपालसमितिविषये, शिक्षकाणां दायित्वविषये च अभाषत। 'भाषाशिक्षकस्तावत् भाषायां दक्षः स्यात्। भाषया एव विषयाः छात्रजनहृदयेषु प्रतिष्ठिताः भवन्ति। संस्कृतशिक्षकाणां निर्मातृणां प्रशिक्षणशास्त्रविभागेषु कार्यरतप्रशिक्षकाणां भाषा विशुद्धा स्यात्' इति सः उपस्थितानुद्बोधयत्। ततश्च संस्थानस्य उपकुलसचिवस्य (परीक्षा) डा. गोपीरमणमिश्रस्य धन्यवादज्ञापनेन उद्घाटनसत्रं समाप्तिमगात्।

उद्घाटनसत्रानन्तरम् अभिमुखीकरणकार्यक्रमः सत्रक्रमेण प्राचलत्। प्रत्येकं सत्रस्य अध्यक्षः, प्रस्तोता सत्रसञ्चालकश्चेति त्रयाणामाचार्याणां मुखेन प्रवर्तनमभूत्। १६.१२.२०१० दिनाङ्के सायं ५.०० वादने संस्थानकुलपतेः आचार्यः राधावल्लभत्रिपाठिनः आध्यक्ष्ये समापनसत्रं प्रवृत्तम्। सत्रमिदं सर्वेषां सत्रसञ्चालकानाम् आचार्याणां सत्रप्रतिवेदनपठनमुखेन आरब्धम्। समुद्बोधकप्रतिनिधिरूपेण आचार्यमुरलीधरशर्मा स्वानुभवं प्रकटयन् अधिगमकेन्द्राणां स्थापनविषये अभाषत। अध्यक्षभाषणे मान्यकुलपतिः हर्षं प्रकटयन् अवोचद्यत्, 'ईदृशाः कार्यक्रमाः भूयो भूयः प्रचलेयुः। कार्यशालानामायोजनं स्यात्। अधिगमकेन्द्राणां स्थापनविषये राष्ट्रियसंस्कृतसंस्थानमवश्यं समुचितं निर्णयं विधास्यति' इति। कार्यक्रमसमन्वयकस्य वाई. एस. रमेशस्य धन्यवादज्ञापनेन कार्यक्रमः सुसम्पन्नतामाप्नोत्। १७.१२.१० दिनाङ्के 'परिसरेषु संस्कृतपाठयोजनानां निर्माणैकरूपता' इति विषयमुपलक्ष्य 'राष्ट्रियसङ्गोष्ठी' अपि एतस्य कार्यक्रमस्य अङ्गतया आयोजिता।

## अधोनिर्दिष्टेषु विषयेषु सत्रक्रमेण विचारमन्थनमभूत् -

**१५.१२.२०१०**

1. Context, Concerns and Vision of Teacher Education : (अध्यापकशिक्षायाः सन्दर्भः.......दृष्टिश्च।)

   अध्यक्षः - आचार्यः गोपीनाथशर्मा, प्रस्तोता - आचार्यः श्रीधरवसिष्ठः, संयोजकः - आचार्या सन्तोष मित्तल

2. Curricular Areas of Initial Teacher Preparation : (प्रारम्भिकशिक्षकसन्नाहस्य पाठ्यचर्याक्षेत्रम्।)

   Curriculmand Pedagogy - (पाठ्यचर्या प्रशिक्षणशास्त्रं च)

   अध्यक्षः - आचार्यः पी. एन्. शास्त्री, प्रस्तोता - आचार्यः रामानुजदेवनाथन्, संयोजकः - आचार्यः सुदेशकुमारशर्मा

3. Urgency of Reforming Teacher Education: (अध्यापनशिक्षायाः नवीकरणस्य त्वरित-आवश्यकता।)

   अध्यक्षः - आचार्यः रामानुजदेवनाथन्, प्रस्तोता - आचार्यः गोपीनाथशर्मा, संयोजकः - आचार्यः फतेहसिंहः

**१६.१२.२०१०**

4. Transacting the Curricular and Evaluating the Developing Teacher : (पाठ्यचर्यायाः निर्वहणं भाविशिक्षकस्य मूल्याङ्कनम्।)

   अध्यक्षः - आचार्यः श्रीधरवशिष्ठः, प्रस्तोता - आचार्यः मुरलीधरशर्मा, संयोजकः - आचार्यः लोकमान्यमिश्रः

5. Continuing Professional Development and Support : (अनुस्यूतवृत्तिविकासः सहकारश्च।)

   अध्यक्षः - आचार्यः रामानुजदेवनाथन्, प्रस्तोता - आचार्यः रविशङ्करमेनन्, संयोजकः - आचार्यः टी. के. शर्मा

6. Transacting the Curricular and Evaluating the Developing Teacher : (पाठ्यचर्यायाः निर्वहणं भाविशिक्षकस्य मूल्याङ्कनम्)

   अध्यक्षः - आचार्यः श्रीहरिकेशसिंहः, प्रस्तोता - आचार्यः मुरलीधरशर्मा, संयोजकः - आचार्यः सी.एच्.एल्.एन्.शर्मा

7. Preparing Teacher Education : (अनुस्यूतवृत्तिविकासः सहकारश्च।)

   अध्यक्षः - आचार्यः श्रीधरवसिष्ठः, प्रस्तोता - आचार्यः श्रीहरिकेशसिंहः , संयोजकः - आचार्यः सोहनलालपाण्डेयः

## सम्मानितः संस्थानकुलपतिः

### विद्यावाचस्पत्युपाधिः

पुणेस्थ-डेक्कनकालेज-स्नातकोत्तरानुसन्धान-संस्थया (Daccen College Post-Graduate Research Institute), अभिमतविद्यापीठस्य ०६.१०.२०१० दिनाङ्के संवृत्ते सप्तम-पदवीप्रदानसमारम्भे (दीक्षान्तसमारोहे) संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी विद्यावाचस्पतिः (Honorary Degree of Doctor of Letters) इति उपाधिना सम्भावितोऽभवत्।

### महाकविकालिदाससंस्कृतसाधनापुरस्कारः

संस्थानस्य कुलपतिः आचार्यः राधावल्लभः त्रिपाठी १०.१२.२०१० दिनाङ्के महाराष्ट्रराज्यस्य महाकविकालिदाससंस्कृत-साधनापुरस्कारेण सभाजितः। नागपुरनगरे समायोजिते भव्यसमारोहे प्रदेशस्य शिक्षामन्त्री अन्येषां मन्त्र्यधिकारिणां गण्यमाननागरिकाणां विदुषां कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयकुलपतेः श्रीपङ्कजचाँदेमहोदयस्य च सान्निध्येऽमुष्मै सम्मानपत्रकमददात्।

## गीतगोविन्दविषयिणी राष्ट्रिया सङ्गोष्ठी सम्पन्ना

२६-२८ नवम्बर, २०१० इत्यवधौ राष्ट्रियसंस्कृतसंस्थानेन मणिपुरस्य नाम्बोलस्थ-राधामाधवसंस्कृतमहाविद्यालये गीतगोविन्द-माश्रित्य काचित् राष्ट्रिया सङ्गोष्ठी समायोजिता। कार्यक्रमेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी चित्राङ्गना-अर्जुनयोः मिथः सम्बन्धविषये कथयन् मणिपुरीसंस्कृतेः वैशिष्ट्यं प्रत्यपादयत्। 'भारतीयसंस्कृतौ मणिपुरराज्यस्य लोकसंस्कृतिः विशेषेण सम्मान्या वर्तते' इत्यपि सः अकथयत्। अवसरेऽस्मिन् मणिपुरस्य सांसदः डा. टी. मैन्यसिंहः, शिक्षा-कौशेय-परिवहनमन्त्री श्री एल. जयन्तकुमारसिंहः, समाजकल्याण-कृषि-लघुसिञ्चन-मन्त्री श्री एन. लोकेनसिंहश्च सम्मानितातिथित्वेन उपस्थाय स्वाभिप्रायान् प्राकटयन्। गीतगोविन्दस्य विख्यातगायकेन पण्डितरघुनाथपाणि-ग्रहिवर्येण सह विहितवार्तः डा. अजयकुमारमिश्रोऽपि तद्वार्तासम्बद्धं विषयं उपस्थापितवान्। महाविद्यालयस्य प्राचार्यः वी. एल. शर्मा धन्यवादज्ञापनमकरोत्। मणिपुरनाट्यविधाः (दशावतार-सोलोनृत्यं, रासलीला सीताकमलनृत्यञ्च) अवसरेऽस्मिन् प्रदर्शिताः अभवन्। रासलीलाः वीक्ष्य उपस्थिताः सुधियः दर्शकाश्च अत्यन्तं मुदिताः जायन्त। दिनत्रयव्यापिनि कार्यक्रमेऽस्मिन् गीतगोविन्दमुद्दिश्य विविधदृष्टिभिः समालोचनं सञ्जातम्।

## सेवानिवृत्तः

राष्ट्रियसंस्कृतसंस्थानस्य नवदेहलीस्थ-मुख्यालये अनुभागाधिकारित्वेन दायित्वधरः श्रीमानसिंहबिष्टः ३०.११.२०१० दिनाङ्के सेवाकालमपूरयत्। अयं महोदयः २५.०७.१९७२ दिनाङ्के सर्वकारीयसेवायां प्रविष्टः आसीत्। समस्तसंस्थानपरिवारः अस्य सुखमयजीवनस्य शुभेच्छां प्रकटयति।

## संस्कृतपुनश्चर्याकार्यक्रमः सम्पन्नः

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानं, राज्यशैक्षिकानु-सन्धानप्रशिक्षणपरिषद्, हरियाणा इत्यनयोः संयुक्ततत्त्वावधाने १८.१०.२०१० तः ०४.११.२०१० पर्यन्तम् अष्टादशदिवसीयः संस्कृत-पुनश्चर्याकार्यक्रमः हरियाणास्थ-गुरुग्रामे सम्पन्नः। उद्घाटन-कार्यक्रमे गुरुग्रामस्य मण्डलायुक्तः श्री टी. के. शर्मा विशिष्टाध्यक्षरूपेण, नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यराधावल्लभः त्रिपाठी मुख्यातिथिरूपेण, नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रिय-संस्कृतविद्यापीठस्य कुलपतिचरः आचार्यश्रीधरवशिष्ठः सारस्वतातिथित्वेन, तथा च पण्डितमाङ्गेरामशर्मा, डा. रघुनाथ-ऐरी इत्यादयो विद्वांसः उपस्थिताः आसन्। आचार्यः श्रीधरवशिष्ठः कार्यक्रमस्य परिचयपुरस्सरं महत्त्वं प्रकटितवान्। संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी अस्य कार्यक्रमस्य वैशिष्ट्य-उपयोगविषये विचारान् प्राकटयत्। कार्यक्रमे समागतः श्री टी.के. शर्मा सङ्गणकीयसंस्कृतसम्बद्धभाषणे व्याकरणाशांश्च बोधितवान्। कार्यक्रमस्यास्य संयोजनं श्रीकरुणेशभारद्वाज- डा. श्रेयांशद्विवेदिनौ अकुरुताम्। कार्यक्रमेऽस्मिन् व्याकरणविदुषी दीक्षित-पुष्पामहोदया पाणिनीव्याकरणे कृतभूरिपरिश्रमा प्रतिभागिभ्यः अष्टाध्याय्यां गहनं प्रशिक्षणं दत्तवती। अत्र संस्कृतसम्बद्धाः बहवो विषयाः अध्यापिताः।



कार्यक्रमस्य किञ्चन दृश्यम्

## कनिष्ठशोधवृत्तिम् (J.R.F) अलभन्त

राष्ट्रियसंस्कृतसंस्थानस्य विविधपरिसरीयच्छात्राः विश्वविद्यालय-अनुदान-आयोग(U.G. C.)द्वारा समायोजितां राष्ट्रियार्हतापरीक्षां समुत्तीर्य कनिष्ठशोधवृत्तिम्(JRF)अलभन्त-

शुभाभिनन्दनम्

गुरुवायूरुपरिसरस्य शोधच्छात्रः - **निधीष्. एम. जी.**

शृङ्गेरीपरिसरस्य शोधच्छात्राः - **श्रीकर जि. एन., श्रीसीतारामशर्मा, सन्तोषकुमारमाझी, सुश्रीः सौम्या के. आर.**

## ब्रह्मणि लीनो ब्रह्मचारी

बिहारप्रान्ते वैदिकविद्यानां प्रचाराय संरक्षणाय च आजीवनं प्रयत्नरतस्य लगमास्थ-जगदीशनारायणब्रह्मचर्याश्रम-आदर्शसंस्कृत-महाविद्यालयादि-संस्थानां संस्थापकस्य ऋषिस्वरूपस्य जगदीश-नारायणब्रह्मचारिमहाराजस्य १२५वर्ष-वयसि दुःखदं देहावसानं २४.१२.२०१० दिनाङ्के रात्रौ जातम्। संस्थानपरिवारः अस्य दिवङ्गतस्य आत्मनः शान्त्यर्थम् ईश्वरं प्रार्थयति।

## समनुष्ठितः स्थापनादिवससमारोहः



स्वागतं व्याहरन् कुलसचिवः रामानुजदेवनाथन् विद्वांसश्च

संस्कृतायोगस्य (१९५६-१९५७) अनुशंसानुसारेण भारतशासनेन संस्कृतस्य विकासप्रचारादिदृष्ट्या केन्द्रशासनस्य संस्कृतसम्बद्धनीतीनां कार्यक्रमाणां च सुचारु-सञ्चालनोद्देश्येन १५.१०.१९७० तमे दिनाङ्के स्वायत्तसङ्घटनरूपेण राष्ट्रियसंस्कृतसंस्थानस्य स्थापना कृता आसीत्। पुनः ०७.०५.२००२ तमे दिनाङ्के भारतशासनमानवसंसाधन-विकासमन्त्रालयः एतं संस्थानं बहुपरिसरीयमानितविश्वविद्यालयत्वेन अघोषयत्। सम्प्रति राष्ट्रियसंस्कृतसंस्थानं देशस्य बृहत्तमः बहुपरिसरीयश्च संस्कृतविश्वविद्यालयत्वेन राराजते।



आत्माभिप्रायं श्रावयन् रेवाप्रसादद्विवेदी तस्य वामतः राधावल्लभः त्रिपाठी, रामकरणशर्मा, रमाकान्तशुक्लश्च

एतादृशस्य बृहत्तमस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य एकचत्वारिंशः स्थापनादिवस-समारोहः १५.१०.२०१० दिनाङ्के अनुष्ठितो जातः। कार्यक्रमारम्भे वैदिकलौकिक-मङ्गलाचरणानन्तरं संस्थानकुलसचिवः आचार्यः रामानुजदेवनाथः अभिनन्दनवचांसि व्याहरन् समारोहममुं सङ्कल्पदिवसत्वेन उपस्थापितवान्। कार्यक्रमस्यास्य मुख्यातिथिः उत्सवमूर्तिश्च आचार्यप्रवरो रेवाप्रसादद्विवेदी (वाराणसीस्थकाशीहिन्दू-विश्वविद्यालयस्य पूर्वसाहित्यविभागाध्यक्षः संस्कृतसङ्कायप्रमुखश्च) स्वाभिप्रायम् अवोचत्। अस्यैव कार्यक्रमस्य अङ्गभूततया देहलीस्थ-देववाणीपरिषदः त्रयोविंशे पण्डितराजमहोत्सवे आचार्यरेवाप्रसाद-द्विवेदी पण्डितराजसम्मानेन अलङ्कृतः।


हिन्दीपक्षोत्सवे जेतृणां कृते पुरस्कारवितरणस्य किञ्चन दृश्यम्

कार्यक्रमेऽस्मिन् सारस्वतातिथित्वेन वरेण्यः संस्कृतमनीषी संस्थानस्य संस्थापक-निदेशकश्च आचार्यः रामकरणशर्मा संस्थानस्य पूर्वघटितम् इतिवृत्तं उच्चारयन् संस्थानस्य अभिवृद्धये मङ्गलाशयान् प्राकटयत्। कार्यक्रमेऽस्मिन् हिन्दीपक्षोत्सवस्पर्धासु जेतृणां कृते पुरस्काराः अपि वितरिताः। अनन्तरं संस्थानकुलपतिना आचार्येण राधावल्लभत्रिपाठिना अध्यक्षीयमुद्बोधनं विहितम्। सः संस्थानस्य विकासाय आत्मनः सङ्कल्पं भृशं प्रत्यपादयत्। कार्यक्रमसञ्चालनं मुक्तस्वाध्यायपीठस्य निदेशकः डा. वाई. एस. रमेशः कृतज्ञताज्ञापनं च उपकुलसचिवः (परीक्षा) डा. जी. आर. मिश्रः अकुरुताम्।

## सुसम्पन्ना अन्ताराष्ट्रिया संस्कृतसङ्गणकभाषावैज्ञानिकसंवादगोष्ठी

१०-१२ दिसम्बर, २०१० मिते काले राष्ट्रियसंस्कृतसंस्थानस्य सहयोगेन नवदेहलीस्थ-जवाहरलालनेहरूविश्वविद्यालयस्य विशिष्टसंस्कृताध्ययनकेन्द्रे चतुर्थ-अन्ताराष्ट्रियसंस्कृतसङ्गणकभाषावैज्ञानिकसंवादगोष्ठी समायोजिता अभूत्। १०.१२.२०१० दिनाङ्के उद्घाटन-कार्यक्रमे कार्यक्रमसंयोजकः डा. गिरीशनाथझा परिचयप्रदानपुरस्सरं स्वागतं व्याहरत्। सं. रा. अमेरिकास्थ-हवाईविश्वविद्यालयस्य आचार्यः रामनाथशर्मा, सं. रा. अमेरिकास्थ- मसाचुसेट्स्-विश्वविद्यालयस्य आचार्यः बलरामसिंहः उपस्थाय उद्घाटनसत्रे उपस्थितानां मार्गदर्शनं विहितवन्तौ। जवाहरलालनेहरूविश्वविद्यालयस्य कुलसचिवः आचार्यः वी. के. जैनः अध्यक्षभाषणं विहितवान्।

उद्घाटनसत्रानन्तरं सत्रक्रमेण बी.एन. पटनायक-वी. एन. झा-के. वी. रामकृष्णमाचार्युलु-गेराड् ह्यूट्-स्वर्णलता-पुष्पकभट्टाचार्य-हेमन्तदरबारी-नवज्योतिसिंह-ब्रेण्डन् गिल्लन-अम्बाकुलकर्णी-मल्हारकुलकर्णी-पिटर् शार्फ्-प्रभृतयोः विद्वांसः विशेषेण उपस्थाय प्रस्तावितविषये व्याख्यानं प्रस्तुतवन्तः। अस्यां सङ्गोष्ठ्याम् उपत्रिंशमहत्त्वपूर्णानि शोधपत्राणि प्रस्तुतानि अभवन्।

अस्याः सङ्गोष्ठ्याः समापनसत्रे आचार्यः कपिलकपूरः, आचार्यः राधावल्लभत्रिपाठी च विशिष्ट-वक्तृत्वेन उपस्थाय स्ववचोभिः प्रसङ्गेऽस्मिन् ज्ञानं वर्द्धितवन्तौ। अवसरेऽस्मिन् केचन सांस्कृतिककार्यक्रमा अपि आयोजिताः अभवन्। संस्थानस्यैव डा. अजयकुमारमिश्रः कस्यचित्सत्रस्य संयोजनमत्राकरोत्।



समापनसत्रस्य किञ्चन दृश्यम्

## सम्पन्ना प्रथमा अन्ताराष्ट्रिया प्राकृतसङ्गोष्ठी




उद्घाटनसमारोहे भाषमाणः संस्थानकुलपतिः राधावल्लभत्रिपाठी, मञ्चे विद्वांसः

नवदेहलीस्थ–राष्ट्रियसंस्कृतसंस्थानस्य कर्णाटकस्य श्रवणबेलगोलास्थ–बाहुबलीप्राकृतविद्यापीठस्य राष्ट्रियप्राकृताध्ययनसंशोधनसंस्थानस्य च संयुक्ततत्त्वावधाने ‘प्राचीनप्राकृतग्रन्थानां वैश्विकमूल्यानि’ इति विषयमाधृत्य काचित् अन्ताराष्ट्रिया प्राकृतसङ्गोष्ठी १२ तः १४ अक्टूबर, २०१० मिते काले सुसम्पन्ना। अस्याः सङ्गोष्ठ्याः उद्घाटनसमारोहे अध्यक्षत्वेन बाहुबलीप्राकृतविद्यापीठस्य संस्थापकाध्यक्षः जगद्गुरुः कर्मयोगी स्वस्तिश्रीः चारुकीर्तिभट्टारकमहास्वामिपादः उपस्थितः आसीत्। सः प्राकृतभाषायाः विकासपरम्पराम् अवर्णयत्। मुख्यातिथिभाषणे राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी प्राकृतविद्यायाः महत्तां प्रकाशितवान्। बाहुबलीप्राकृतविद्यापीठस्य कार्याध्यक्षः एम. जे. इन्द्रकुमारः समागतानाम् अतिथीनां स्वागतं व्याहरत्। राष्ट्रियप्राकृताध्ययनसंशोधनसंस्थानस्य निदेशकः प्रेमसुमनजैनः प्राकृतभाषाविकाससम्बद्धप्रयत्नानां विषये अभाषत। जर्मनीस्थ–म्यूनिखविश्वविद्यालयस्य अध्यापकः आचार्यः राबर्ट–जेडिनबोसः अपि च राजस्थानस्य लाडनूंस्थ–जैनविश्वभारतीविश्वविद्यालयस्य कुलपतिः आचार्या मङ्गलप्रज्ञा सभां सम्बोधितवन्तौ। अवसरेऽस्मिन् कार्यक्रमस्य स्मारिका, आचार्यप्रेमसुमनजैनविरचितो ग्रन्थः प्राकृत प्राइमर्, आचार्य–विलियमबोली–अनूदितः रत्नकरण्डश्रावकाचार–ग्रन्थः च लोकायार्पिताः अभूवन्।




सङ्गोष्ठ्यां भागग्रहिणः विद्वांसः

त्रिदिवसीयसङ्गोष्ठ्यामस्यां विविधविषयानाधृत्य पञ्च सत्राणि प्रवृत्तानि। विविधविषयेषु विद्वांसः शोधपत्राणि प्रास्तुवन्। २०१२ तमे वर्षे आयोजयिष्यमाणस्य प्रथमविश्वप्राकृतसम्मेलनस्य विषयेऽपि काचित् चर्चागोष्ठी सङ्गोष्ठ्यङ्गतया समभूत्। आचार्यः एडेलहेड–मेट्टे (जर्मनी), आचार्या नलिनीबलवीर (फ्रांस), आचार्यः जोहानस् ब्राङ्कहार्सट् (स्विटजरलैण्ड्), आचार्यः जयेन्द्रसोनी (मारवर्ग्, जर्मनी), आचार्यः हर्मन् टिकेन् (नीदरलैण्ड्), डा. ल्यूटगार्ड्सोनी (जर्मनी), श्रीमती साराफिक (सं. रा. अमेरिका), डा. एवा मारिया (म्यूनिख, जर्मनी) चेत्यते वैदेशिकाः विद्वांसः सङ्गोष्ठ्यां समागताः आसन्। भारतस्य प्रायः ६० विद्वांसः अत्रः उपस्थिताः अभवन्। तेषु आचार्यः हम्पानागराजय्या (बेङ्गलूरु), आचार्यः दयानन्दभार्गवः (जयपुरम्), आचार्यः राजारामजैनः (नोएडा), आचार्यः महावीरराजगेलडा (जयपुरम्), आचार्यः सागरमलजैनः (शाजापुरम्), आचार्या कमला हम्पना (बेङ्गलूरु), आचार्यः रामप्रकाशपोद्दारः (पुणे), आचार्यः शुभचन्द्रः (मैसूरु), आचार्या नलिनी जोशी (पुणे), आचार्या पद्मा शेखर (मैसूरु), आचार्यः विजयकुमारजैनः (लखनऊपरिसरः) आचार्यः श्रेयांसकुमारसिङ्घई (जयपुरपरिसरः), डा. कल्पनाजैन (दिल्ली), डा. धर्मेन्द्रजैनः (जयपुरपरिसरः), डा. अनेकान्तजैनः (दिल्ली) डा. रजनीशशुक्ला (संस्थानमुख्यालयः, नवदेहली), डा. एन. सुरेशकुमारः (मैसूरु) इत्यादयः प्रमुखाः विद्वांसः आसन्।

१४.१०.२०१० दिनाङ्के चारुकीर्तिभट्टारकस्वामिपादस्य उपस्थितौ पुणेस्थ–भण्डारकरप्राच्यशोधसंस्थानस्य प्राकृतशब्दकोशपरियोजनायाः सम्पादकस्य आचार्यरामप्रकाशपोद्दारस्य विशिष्टातिथित्वे आचार्य–हम्पानागराजय्यावर्यस्य आध्यक्ष्ये च समापनसत्रं प्रवृत्तम्। सत्रेऽस्मिन् आचार्यदयानन्दभार्गव–आचार्यमहावीरराजगेलडावर्यौ सङ्गोष्ठ्याः संस्तुतीः प्रस्तुतवन्तौ। इत्येवं सङ्गोष्ठीयं साफल्यं गता।

## शङ्करजयन्तीव्याख्यानकार्यक्रमः आयोजितः



राष्ट्रियसंस्कृतसंस्थानस्य भारतीयदार्शनिकानुसन्धानपरिषदश्च संयुक्ततत्त्वावधाने १६.१०.२०१० दिनाङ्के नवदेहल्यां मैक्समूलरमार्गस्थ–‘इण्डिया इन्टरनेशनल् सेन्टर् अनेक्सी’–प्रेक्षागृहे प्रथमशङ्करजयन्तीव्याख्यानकार्यक्रमः समायोजितो जातः। ‘शङ्करशिक्षाभिः वयं किं ज्ञातुं शक्नुमः’ इति विषयाधारितेऽस्मिन् कार्यक्रमे कोयम्बटुरस्थ–आर्षविद्यागुरुकुलस्य स्वामिदयानन्दसरस्वतीपादः मुख्यभाषणमकरोत्। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यराधावल्लभत्रिपाठी कार्यक्रमस्यास्य आध्यक्ष्यं निर्व्यूढवान्।

## कुलपतेः दैनन्दिनी

| | |
|---|---|
| ०६.१०.१० | पुणेस्थ-डेक्कनकालेज-पदव्युत्तर-संशोधनसंस्था(Daccen College Post-Graduate Research Institute)-अभिमतविद्यापीठस्य सप्तम-पदवीप्रदानसमारम्भे (दीक्षान्तसमारोहे) विद्यावाचस्पतिः (Honorary Degree of Doctor of Letters) इति उपाधिना सम्मानितः। |
| १२.१०.१० | कर्णाटकस्य श्रवणबेलगोलानगरे समायोजितायाम् अन्ताराष्ट्रियप्राकृतसङ्गोष्ठ्याम् उद्घाटनसत्रे मुख्यातिथित्वम्। |
| १५.१०.१० | राष्ट्रियसंस्कृतसंस्थानस्य एकचत्वारिंशे स्थापनादिवससमारोहे आध्यक्ष्यम्। |
| १६.१०.१० | नवदेहलीस्थ-इण्डिया इन्टरनेशनल्-सेन्टर्-अनेक्सीप्रेक्षागृहे आयोजिते शङ्करजयन्तीव्याख्यानकार्यक्रमे अध्यक्षभाषणम्। |
| १८-१९.१०.१० | नवदेहलीस्थ-इण्डिया-इन्टरनेशनल्-सेन्टर्-द्वारा समायोजिते फ्रांसदेशीय-इतिहासकारस्य पुरातत्त्वविदः च आचार्यस्य गेराड् फ्यूजमेन् महोदयस्य व्याख्याने उपस्थितिः। |
| २२.१०.१० | राष्ट्रियसंस्कृतसंस्थानस्य प्रबन्धमण्डलस्य उपवेशने आध्यक्ष्यम्। |
| २५-२७.१०.१० | नवदेहलीस्थ-लिटिल्-थियेटर्-ग्रुप् (एल.टी.जी.)-प्रेक्षागृहे कौमुदीमहोत्सवस्य समायोजनम्। |
| २८.१०.१० | नवदेहल्यां टैगोरगार्डन् इत्यत्र केन्द्रीयविद्यालये प्राचार्यस्य सेवानिवृत्ति-कार्यक्रमे आध्यक्षम्। |
| ३०.१०.१० | भोपालपरिसरे बुन्देली-संस्कृत-शब्दकोशपरियोजनायाः विद्वत्परिचायिकापरियोजनायाश्च उपवेशने आध्यक्ष्यम्। |
| ०१.११.१० | चिन्मय-इन्टरनेशनल्-फाउण्डेशन्-आदर्शशोधसंस्थानं राष्ट्रिय-पाण्डुलिपि-मिशन् इत्येताभ्यां संस्थाभ्याम् आयोजितायां प्रगमन-पाण्डुलिपि-पुरालिपिविज्ञानकार्यशालायाम् उद्घाटनभाषणम्। |
| ०८.११.१० | नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कार्यपरिषदः उपवेशने उपस्थितिः। |
| ११.११.१० | मध्यप्रदेशस्य सागरस्थ-डा. हरिसिंहगौरविश्वविद्यालयेन समायोजितायां राष्ट्रिय-अद्वैतसङ्गोष्ठ्याम् उद्घाटनसत्रे व्याख्यानम्। |
| १२-१४.११.१० | पुणेस्थ-भारतीविद्यापीठे भारतीयविश्वविद्यालयसङ्घटनस्य ८५तमे वार्षिकोपवेशने उपस्थितिः। |
| १३.११.१० | वाईस्थ-प्रज्ञा-पाठशालायाः निरीक्षणम्। |
| १८.११.१० | इण्डिया-इन्टरनेशनल्-सेन्टर् इत्यत्र विश्वसंस्कृतसम्मेलनसम्बद्धोपवेशने डा. कपिला-वात्स्यायनमहोदयया सह चर्चा। |
| २२.११.१० | विमर्शपत्रिकासम्बद्धे उपवेशने आध्यक्ष्यम्। |
| २६.११.१० | पालि-प्राकृतपरिचयपाठ्यक्रमसम्बद्धोपवेशने भाषायाः संयुक्तसचिवया सह उपवेशनम्। |
| २८.११.१० | मणिपुरस्य नाम्बोलस्थ-राधामाधवसंस्कृतमहाविद्यालये जयदेवप्रणीतगीतगोविन्दाधारितायां राष्ट्रियसङ्गोष्ठ्यां गीतगोविन्दोत्सवे च उपस्थितिः। |
| ३०.११.१० | नवदेहलीस्थ-राष्ट्रियशिक्षा-अनुसन्धानप्रशिक्षणपरिषदा (NCERT द्वारा) समायोजिते अभिमुखीकरणकार्यक्रमस्य उद्घाटनसत्रे मुख्यातिथित्वम्। |
| ०१.१२.१० | कालिकटस्थ-आदर्शसंस्कृतमहाविद्यालयस्य चयनसमितेः उपवेशने उपस्थितिः। इन्दिरागान्धीराष्ट्रियकलाकेन्द्रे संस्कृतिमन्त्रालयेन आयोजिते राष्ट्रियपाण्डुलिपिमिशन् इत्यस्य पुनरीक्षणोपवेशने उपस्थितिः। |
| ०३.१२.१० | अहमदाबादस्थ-श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य नाट्यमहोत्सवस्य उद्घाटनकार्यक्रमे सारस्वतातिथित्वम्। |
| ०६-०८.१२.१० | मध्यप्रदेशस्य सागरस्थ-डा.हरिसिंहगौरविश्वविद्यालये संस्थानेन समायोजिते अखिलभारतीयसंस्कृतनाट्योत्सवे उपस्थितिः। |
| ०९.१२.१० | त्रिवेणी-कलासङ्गमे नाट्यशास्त्रकार्यशालायां व्याख्यानम्। |
| १०.१२.१० | नागपुरे महाराष्ट्रसर्वकारस्य महाकविकालिदाससंस्कृतसाधनापुरस्कारः सम्प्राप्तः। |
| ११.१२.१० | वैदिकसंशोधनमण्डलेन पुणेस्थ-आदर्शसंस्कृतशोधसंस्थया च 'छन्दश्शास्त्रं - उत्पत्तिः विकासश्च' इत्यस्मिन् विषये समायोजितायां राष्ट्रियसङ्गोष्ठ्याम् उद्घाटनसत्रे उपोद्घातभाषणम्। |
| १५-१६.१२.१० | संस्थानमुख्यालये शिक्षाशास्त्रसम्बद्धसङ्गोष्ठ्यां समुपस्थितिः। |
| १८.१२.१० | नवदेहल्यां टैगोरगार्डन् इत्यत्र केन्द्रीयविद्यालयस्य विद्यालयप्रबन्धसमितेः उपवेशने आध्यक्ष्यम्। |
| १९.१२.१० | इलाहाबाद-विश्वविद्यालयेन समायोजितायाम् अन्ताराष्ट्रियसङ्गोष्ठ्याम् उद्घाटनसत्रे आध्यक्ष्यम्। |
| २०-२१.१२.१० | संयुक्तसचिवया (भाषायाः) सह GIAC उपवेशने उपस्थितिः। |
| २३.१२.१० | उत्तरप्रदेशस्य हरिद्वारस्थ-उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कार्यपरिषदः १३तमे उपवेशने उपस्थितिः। |
| २४.१२.१० | शोधप्रकाशनमण्डलस्य उपवेशने आध्यक्ष्यम्। |
| २६-२९.१२.१० | राष्ट्रियसंस्कृतसंस्थानस्य केरलस्थ-गुरुवायूरुपरिसरे समायोजिते युवमहोत्सवे उपस्थितिः। |

## संस्थानविदुषां क्रियाकलापाः/उपलब्धयः

**डा. शिशिरकुमारपाण्डेयः** (लखनऊ-परिसरः) - भारतीयसांस्कृतिकसम्बन्धपरिषदा प्रतिनियुक्तो हिन्दीविषयकाचार्योऽयं रसियादेशस्य मास्कोनगरे वर्षद्वयं यावद्वैदेशिकीं सेवां सम्पाद्य प्रतिनिवृत्तः २७.१०.१० दिनाङ्के परिसरीयं कार्यभारं ग्रहितवान्।

**डा. रमाकान्तपाण्डेयः** (जयपुरपरिसरः) -जयपुरस्थ-जवाहरकलाकेन्द्रस्य शिल्पग्रामे २३.११.२०१० दिनाङ्के समायोजिते राजस्थानहिन्दीग्रन्थ-अकादम्या पुस्तकपर्वणि जयपुरपरिसरे प्राध्यापकः डा. रमाकान्तपाण्डेयः राजस्थानसंस्कृत-अकादम्या प्रायोजिते लेखकपाठकसंवादसमारोहे विशिष्टातिथित्वेन व्याख्यानं दत्तवान्। सः तत्र संस्कृतस्य विकासविषये राष्ट्रियसंस्कृतसंस्थानेन क्रियमाणानां कार्याणां समुल्लेखपूर्वकं काव्यपाठं प्रास्तौत्।

**डा. के. वि. सोमयाजुलु** (पुरीपरिसरः) - व्याकरणविभागस्य उपाचार्योऽयं ०४.१२.२०१० तः ०६.११.२०१० पर्यन्तं चेन्नैनगरस्थे श्रीशाङ्करगुरुकुले समायोजितायां विद्वत्सदसि व्याकरणशास्त्रे विशिष्टव्याख्यानमकार्षीत्।

**डा. (श्रीमती) मिनति रथः** (पुरीपरिसरः) - पुराणविभागस्य उपाचार्या इयं २९.११.२०१० तमे दिनाङ्के भुवनेश्वरस्थ-उत्कलसंस्कृताकादम्याः रजतजयन्तीपालनावसरे उत्कलविश्वविद्यालयस्य कुलपतेः द्वारा श्रेष्ठपौराणिकपण्डित-श्रीसोमनाथदाशस्मृतिसम्मानेन सम्मानिता।

**डा. सुकान्तकुमारसेनापतिः** (पुरीपरिसरः) - सर्वदर्शनविभागाध्यक्षोऽयं ०१.१२.२०१० तः ०६.११.२०१० पर्यन्तं तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य पारम्परिकशास्त्राध्ययनसमुत्कर्षकेन्द्रद्वारा संक्षिप्तपाठ्यक्रमयोजनान्तर्गततया वेदान्तपरिभाषायाः विषयविशेषज्ञत्वेन विशेषाध्यापनं व्यदधात्। दिसम्बरमासस्य २७, २८ दिनाङ्कयोः भुवनेश्वरस्थयोगप्राच्यविद्याप्रतिष्ठान-पक्षतः समायोजितायां योगसूत्राख्यायां राष्ट्रियसङ्गोष्ठ्यां समाधिविषये शोधपत्रमपठत्।

**डा. रमाकान्तमिश्रः** (पुरीपरिसरः) - शिक्षाशास्त्रिविभागस्य सहाचार्योऽयं ०८.११.२०१० तः २८.११.२०१० पर्यन्तं शिमलास्थे हिमाचलप्रदेशविश्वविद्यालये पुनश्चर्यापाठ्यक्रमे भागमवहत्।

**डा. अजयकुमारमिश्रः** (संस्थानमुख्यालयः) - दूरस्थशिक्षायां सहायकप्राध्यापकोऽयं नवदेहलीस्थ-जवाहरलालनेहरूविश्वविद्यालये ०३. ११.२०१० दिनाङ्के 'ई-लर्निंग एण्ड मल्टीमीडिया फार् एज्युकेशन्' इत्येतत् सम्बद्धकार्यशालायां भागं गृहीत्वा शोधपत्रमपि प्रास्तौत्। १०-१२ दिसम्बर, २०१० दिनाङ्केषु जवाहरलालनेहरूविद्यालये अन्ताराष्ट्रिय-संस्कृत-सङ्गणकीय-भाषावैज्ञानिक-परिसंवादकार्यक्रमे भागग्रहणपुरस्सरं कस्यचित् सत्रस्य संयोजनमकरोत्। नाम्बोलस्थे राधामाधवसंस्कृत-महाविद्यालये समायोजितायां गीतगोविन्दसङ्गोष्ठ्यां स्वकीयं लेखं च प्रास्तौत्।

**डा. रामचन्द्रजोयिस् डा. गणेश ईश्वरभट्टश्च** (शृङ्गेरीपरिसरः) - अक्टूबरमासस्य ०२-०३ दिनाङ्कयोः हैदराबादस्थ-संस्कृत-अकादमीपक्षतः आयोजितायां राष्ट्रियसंगोष्ठ्यां 'भारतीयसंस्कृतिः संस्कृतं च' इति विषयमधिकृत्य साहित्यप्राध्यापकः डा. रामचन्द्रजोयिस्, वेदान्तप्राध्यापकः डा. गणेश ईश्वरभट्टश्च भागं गृहीत्वा शोधपत्रं प्रास्तुताम्।

**डा. चन्द्रकान्तः डा. सोमनाथसाहुः च** (शृङ्गेरीपरिसरः) - अक्टूबरमासस्य १६-१७ दिनाङ्कयोः शिवमोगास्थ-कुवेम्पुविश्वविद्यालये प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा शिक्षाशास्त्रप्राध्यापकौ डा. चन्द्रकान्तः डा. सोमनाथसाहुः एतौ शिक्षाविषयकौ शोधप्रबन्धौ प्रस्तुतवन्तौ।

**डा. भगवानसामन्तरायः** (शृङ्गेरीपरिसरः) - दिसम्बर्मासस्य १५-१८ दिनाङ्केषु तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठे प्रचलिते शास्त्रवारिधिशैक्षिककार्यक्रमे वेदान्तप्राध्यापकोऽयं विशिष्टाध्यापकत्वेन भागं गृहीतवान्।

**डा. महाबलेश्वर पी. भट्टः** (शृङ्गेरीपरिसरः) - दिसम्बर्मासस्य २२-२६ दिनाङ्केषु तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठे प्रचलिते शास्त्रवारिधिशैक्षिककार्यक्रमे वेदान्तविभागाध्यक्षोऽयं विशिष्टाध्यापकत्वेन भागं गृहीतवान्।

**श्रीश्यामसुन्दरभट्टः** (शृङ्गेरीपरिसरस्य) - नव्यन्यायविभागे प्राध्यापकोऽयं विश्वविद्यालय-अनुदान-आयोगेन समायोजितायां राष्ट्रिययोग्यतापरीक्षायां (NET) उत्तीर्णः।

**श्रीतङ्गल्लपल्लि महेन्द्रः** (संस्थानमुख्यालयः) - संस्थानमुख्यालये दूरस्थशिक्षाविभागे शोधसहायकत्वेन कार्यं कुर्वाणोऽयं तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठे डा. चक्रवर्ति-रङ्गनाथन्-वर्यस्य मार्गदर्शने 'महाभारतस्य शान्त्यानुशासनिक-पर्वणोस्सुभाषितानां राजनैतिकं सामाजिकञ्चानुशीलनम्' इति विषयकं शोधप्रबन्धमुपस्थाप्य विद्यावारिधि-उपाधिमलभत।

## शृङ्गेरीस्थ-श्रीराजीवगान्धीपरिसरेण आयोजिताः कार्यक्रमाः

**शारदाविशिष्टव्याख्यानमाला** – ०२.१०.२०१० दिनाङ्के शारदाविशिष्टव्याख्यानमालायाः तृतीयकुसुमरूपेण कोलकात्तास्थ-श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयस्य साहित्यविभागस्य वरिष्ठप्राध्यापकेन डा. बुद्धेश्वरषडङ्गिमहाभागेन 'काव्यतत्त्वविमर्शः' इति विषयमधिकृत्य व्याख्यानं प्रस्तुतम्। सभाध्यक्षः आचार्यः ए. पि. सच्चिदानन्दः तस्य सारस्वतसाधनं कविप्रतिभां च प्राशंसत्। 'साहित्यं तदेव भवति यत् समाजस्योपकारं साधयति प्रायोगिकक्षेत्रे च जनान् प्रवर्तयति। अस्मच्छात्राः तेभ्यः प्रेरणां प्राप्य अल्पे वयसि बादरायणव्यासपुरस्कारभाजः भवन्तु' इत्यपि सः आशां प्राकटयत्। नव्यन्यायविभागाध्यक्षः डा. नवीनहोळ्ळः सभां समचालयत्।



काव्यतत्त्वविमर्शः इति विषये भाषमाणः बुद्धेश्वरषडङ्गी

०२.११.२०१० दिनाङ्के श्रीशारदाविशिष्टव्याख्यानमालायाः चतुर्थं कुसुमं पुण्यपत्तनस्थः न्यायमीमांसावेदान्तेषु प्रथितः विद्वान् बादरायणव्यासपुरस्कारभाक् आचार्यः देवदत्तगोविन्दपाटीलः प्राफुल्लयत्। तेन 'न्यायमीमांसयोः शाब्दबोधे तुलनात्मकं चिन्तनम्' इति विषयमधिकृत्य सम्यक् व्याख्यातम्। प्राचार्यः तस्य विद्वत्त्वम् अनन्तश्रीविभूषितस्य जगद्गुरोः श्रीश्रीभारतीतीर्थमहास्वामिपादस्य अनुग्रहभाक्त्वं च समस्मरत्। मीमांसाप्राध्यापकः डा. सुब्राय वि. भट्टः अभ्यागतानां परिचयप्रदानपुरस्सरं सर्वेभ्यः स्वागतं व्याहरत्; डा. नवीनहोळ्ळमहोदयश्च सभां समचालयत्।



श्रीशारदाविशिष्टव्याख्यानमालायां भाषमाणः मल्हारकुलकर्णी

०१.१२.२०१० दिनाङ्के श्रीशारदाविशिष्टव्याख्यानमालायाः पञ्चमाधिवेशनं समायोजयत। तत्र मुम्बापुरीनगरस्थस्य भारतीयप्रोद्यौगिक-संस्थाने (आई.आई.टी) सङ्गणकीयभाषाविज्ञानविभागे उपाचार्यत्वेन कार्यं कुर्वाणः बादरायणव्यासपुरस्कारभाक् डा. मल्हारकुलकर्णी मुख्याभ्यागतत्वेन समागमत्। सः 'पाणिनीयव्याकरणस्य वैज्ञानिकत्वम्' इति विषयमधिकृत्य छात्रान् व्यबोधयत्। अध्यक्षस्थाने विराजमानः प्राचार्यः ए. पी. सच्चिदानन्दः उक्तवान् यत् 'सङ्गणकयन्त्रे भाषानुवादसन्दर्भे पाणिनीयव्याकरणस्य कियन्महत्त्वमिति इदानीम् अनुसन्धित्सवः सङ्गणकविज्ञानिनः अन्वभवन्।' कार्यक्रमममुं डा. नवीनहोळ्ळ-श्रीकृष्णानन्तपद्मनाभौ समचालयताम्।

**गान्धिजयन्त्युत्सवः** – ०२.११.२०१० दिनाङ्के गान्धिजयन्तीमुपलक्ष्य कश्चन कार्यक्रमः आयोजितः। डा. बुधेश्वरषडङ्गिमहोदयः काव्यकुसुमैः गान्धिमहोदयमस्तुतवान्। साहित्यप्राध्यापकेन डा. राघवेन्द्रभट्टेन 'गान्धिनः जीवनं सरलं किन्तु तस्य चिन्तनधारा विशिष्टा आसीत्। अतः तेनोक्तः मार्गः सर्वैरपि अनुसर्तव्यः' इति विचारः प्रकटितः। परिसरप्राचार्यः ए. पि. सच्चिदानन्दः गान्धिनः मौलिकशिक्षाविषये विशेषावधानं प्रदाय शिक्षाक्षेत्रे गान्धिमहोदयस्य योगदानं भृशं समस्मारयत्।

**अध्यापकवाक्यार्थपरिषद्** – २६.१०.१० दिनाङ्के अध्यापकवाक्यार्थपरिषदः चतुर्थमधिवेशनं न्यायविभागाध्यक्षस्य डा. नवीनहोळ्ळस्य पर्यवेक्षकत्वे समपद्यत। तत्र 'दम्पत्योः सहाधिकारः' इति विषये डा. सुब्राय वि. भट्टः, 'स्वरितेनाधिकारः' इति विषये डा. चन्द्रशेखरभट्टः, 'वाक्याधिकरणम्' इति विषये श्रीवेङ्कटेशताताचार्यः, 'विवाहमेलापकम्' इति विषये श्री एच्. वी. श्रीनाथः च वाक्यार्थान् व्यदधुः। साहित्यप्राध्यापकः डा. रामचन्द्रजोयिसः सभां समचालयत्।

३०.११.२०१० दिनाङ्के अध्यापकवाक्यार्थपरिषदः पञ्चममधिवेशनं प्राचार्यस्य ए. पि. सच्चिदानन्दस्य पर्यवेक्षकत्वे संवृत्तम्। तत्र डा. सि. एस्. एस्. नरसिंहमूर्तिः 'सम्बोधनप्रथमा', डा. ई. पि. श्रीदेवीः 'व्यक्तिविवेकदिशा साध्यसाधनभावविचारः', डा. रामचन्द्रजोयिस् 'उपमेयोपमालक्षणपरिष्कारः', डा. भगवानसामन्तरायः 'वैषम्यनैर्घृण्याधिकरणम्', श्रीनवीनः 'हेत्वाभासलक्षणस्थयद्रूपपदार्थविवरणम्' इत्येवम् अध्यापकाः स्वीयाभिमतविषयेषु वाक्यार्थं प्रास्तुवन्। मीमांसाप्राध्यापकः वेङ्कटेशताताचार्यः सभां समचालयत्।

**रक्तदानशिबिरम्** – २६.१०.२०१० दिनाङ्के रक्तदानशिबिरं प्राचलत्। तत्र छात्राः अध्यापकाश्च मिलित्वा २६ जनाः रक्तदानमकुर्वन्। एतत्कार्यं शिक्षाशास्त्रिप्राध्यापकेन डा. हरिप्रसादवर्येण तथा शृङ्गेरीस्थ-शारदाधन्वन्तरीदातव्यचिकित्सालयस्य वैद्यैः कार्यकर्तृभिश्च निर्वर्तितम्।

**शिक्षकप्रशिक्षणवर्गः** – २५.०९.१० तः ०३.१०.१० दिनाङ्कं यावत् संस्कृतभारतीपक्षतः शिक्षकप्रशिक्षणवर्गः परिसरे आयोजितः। तत्र उपपञ्चाशच्छात्राः भागमगृह्णन्। तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य आचार्यः डा. एम्. एल्. नरसिंहमूर्तिमहोदयः शिबिरमुदघाटयत्। राष्ट्रियसंस्कृतसंस्थानस्य परीक्षाविभागस्य उपकुलसचिवः डा. गोपीरमणमिश्रः समापनसमारोहे मुख्याभ्यागतः आसीत्। शिक्षाशास्त्रप्राध्यापकः डा. हरिप्रसादः संस्कृतभारत्याः कार्यकर्ता श्रीनागराजश्च कार्यक्रमममुं समचालयताम्।

**राज्यस्तरीयशास्त्रवाक्स्पर्धा** – स्वर्णवल्ल्यामायोजितायां राज्यस्तरीयशास्त्रवाक्स्पर्धायां वेदान्ताध्यापकस्य डा. गणेश ईश्वरभट्टस्य मार्गदर्शने परिसरच्छात्राः अत्युत्तमाङ्कैः प्रथमस्थानं प्राप्नुवन्। तत्र च शशिकला भट्टः प्रथमा (साहित्ये), विश्वनाथभट्टः द्वितीयः गणेशभट्टश्च तृतीयः (अद्वैतवेदान्ते), मुकेशकुमारः द्वितीयः (ज्यौतिषे), राघवेन्द्रः द्वितीयः (नव्यन्याये), सन्दीपः तृतीयः (अन्त्याक्षर्यां नव्यन्याये च), शम्भुनाथः द्वितीयः (नव्यव्याकरणे) इत्येवं प्रकारेण स्थानानि प्राप्तवन्तः।

**शिक्षकप्रशिक्षणवर्गः** – २५.०९.१० तः ०३.१०.१० दिनाङ्कं यावत् संस्कृतभारतीपक्षतः शिक्षकप्रशिक्षणवर्गः परिसरे आयोजितः। तत्र उपपञ्चाशच्छात्राः भागमगृह्णन्। तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य आचार्यः डा. एम्. एल्. नरसिंहमूर्तिमहोदयः शिबिरमुद्घाटयत्। राष्ट्रियसंस्कृतसंस्थानस्य परीक्षाविभागस्य उपकुलसचिवः डा. गोपीरमणमिश्रः समापनसमारोहे मुख्याभ्यागतः आसीत्। शिक्षाशास्त्रप्राध्यापकः डा. हरिप्रसादः संस्कृतभारत्याः कार्यकर्ता श्रीनागराजश्च कार्यक्रममममुं समचालयताम्।

**राज्यस्तरीयशास्त्रवाक्स्पर्धा** – स्वर्णवल्ल्यामायोजितायां राज्यस्तरीयशास्त्रवाक्स्पर्धायां वेदान्ताध्यापकस्य डा. गणेश ईश्वरभट्टस्य मार्गदर्शने परिसरच्छात्राः अत्युत्तमाङ्कैः प्रथमस्थानं प्राप्नुवन्। तत्र च शशिकला भट्टः प्रथमा (साहित्ये), विश्वनाथभट्टः द्वितीयः गणेशभट्टश्च तृतीयः (अद्वैतवेदान्ते), मुकेशकुमारः द्वितीयः (ज्यौतिषे), राघवेन्द्रः द्वितीयः (नव्यन्याये), सन्दीपः तृतीयः (अन्त्याक्षर्यां नव्यन्याये च), शम्भुनाथः द्वितीयः (नव्यव्याकरणे) इत्येवं प्रकारेण स्थानानि प्राप्तवन्तः।




राष्ट्रियशैक्षिकदिवसकार्यक्रमे सभां सम्बोधयन् वाई.एस.रमेशः

**राष्ट्रियशैक्षिकदिवसः** – ११.११.२०१० दिनाङ्के परिसरे भारतस्य आद्यशिक्षामन्त्रिणः अबुल्कलामाजाद्वर्यस्य जन्मदिनं निमित्तीकृत्य राष्ट्रियशैक्षिकदिवसः समनुष्ठितः। अभ्यागतरूपेण राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायकेन्द्रस्य निदेशकः डा. वाई. एस. रमेशः समागतः आसीत्। सः महामहिमशालिनः डा. आजादवर्यस्य शैक्षिकचिन्तनं विवृत्य शैक्षिकोपन्यासम् अकरोत्। आध्यक्ष्यस्थानम् अलङ्कुर्वता परिसरप्राचार्येण ए. पि. सच्चिदानन्दवर्येण शिक्षाशास्त्रिणाम् इतिकर्तव्यताविषये सूपपादितम्। डा. हरिप्रसादः प्रास्ताविकं भाषणमकरोत्। डा. गणेशपण्डितः कार्यक्रमस्यास्य समायोजकः आसीत्।

**राज्यस्तरीयशास्त्रीयभाषण-शलाकास्पर्धा** – दिसम्बर्मासस्य २१ तः २४ पर्यन्तं बेङ्गलूरूस्थे पूर्णप्रज्ञविद्यापीठे प्रचलितायां राज्यस्तरीयशास्त्रीयभाषण- शलाकास्पर्धायां डा. चन्द्रशेखरभट्ट-डा. चन्द्रकलाकोण्डिमहोदययोः मार्गदर्शने अधोनिर्दिष्टाः छात्राः विविधान् पुरस्कारान् प्राप्य विजयवैजयन्तीं सम्पादितवन्तः। तद्यथा – **शान्तालक्ष्मी के.जी.** (आ. II) साहित्यशलाकायां प्रथमा, **भानुप्रतापशर्मा** (आ. II) साहित्यभाषणे तृतीयः, **मुकेशकुमारः** (आ. II) ज्योतिषभाषणे प्रथमः, **महेशकानिट्कर्** (शा. I) ज्योतिषशलाकायां तृतीयः, **अर्चनाकारन्तः** (आ. II) व्याकरणशलाकायां प्रथमा, **जयकृष्णः** (आ. II) व्याकरणशलाकायां तृतीयः, **शम्भुनाथभट्टः** (आ. I) व्याकरणभाषणे द्वितीयः, **भारती एस्.** (शा. III) व्याकरणभाषणे तृतीया समस्यापूर्तौ प्रथमा च, **शकुन्तलाभट्टः** (आ. II) वेदान्तशलाकायां द्वितीया, **रञ्जनीभट्ट बी.एस.** (आ. II) वेदान्तशलाकायां तृतीया, **सन्दीपकानित्करः** (आ. I) न्यायभाषणे प्रथमः, **राघवेन्द्रः पी. अरोळळी** (आ. I) न्यायशलाकायां द्वितीयः, **श्रीधरभट्टः** (आ. I) धर्मशास्त्रभाषणे द्वितीयः, **अमरनाथशर्मा** (शा. III) अष्टाध्यायीकण्ठपाठे प्रथमः, **राकेशकुमारः** (आ. II) पुराणेतिहासशलाकायां प्रथमः, **विश्वनाथहेगडे** (शा. III) समस्यापूर्तौ द्वितीयः, **मेखलाभट्टः** (प्रा. शा. II) काव्यशलाकायां द्वितीया।



राज्यस्तरीयभाषणशलाकास्पर्धायां विजयवैजयन्तीं प्राप्तवन्तः परिसरच्छात्राः

परिसरवार्ता

## गुरुवायूर्-परिसरस्य वार्ता:

**राष्ट्रियसेवासङ्घटनस्योद्घाटनम्** – १५.१०.२०१० दिनाङ्के ऐदम्प्राथम्येन राष्ट्रियसेवासङ्घस्य (NSS इत्यस्य) समुद्घाटनम् आचार्यः के. एन्. रमेशन् दीपप्रज्वालन-पूर्वकं कृतवान्। अस्मिन् अवसरे परीक्षानिदेशकः डा. जी. आर्. मिश्रः मुख्यातिथिः आसीत्। तेन आशंसावचोभिः अस्य कार्यक्रमस्य चोदनं कृतम्। कार्यक्रमेऽस्मिन् अध्यक्षभाषणं परिसरप्राचार्येण के. टी. माधवेन कृतम्। सङ्घकार्यदर्शिना डा. हर्षकुमार्-महाभागेन स्वागतं विहितम्। उपकार्यदर्शिन्या डा. के. सरलामहाभागया कार्तज्ञ्यं वितरितम्।



सभां सम्बोधयन् परीक्षानियन्त्रकः जी.आर.मिश्रः विद्वांसश्च

## लखनऊपरिसरस्य कार्यक्रमाः




कार्यशालायाः किञ्चन दृश्यम्

**म. म. गोपीनाथकविराजस्मृतिव्याख्यानमाला** – २१.१०.२०१० दिनाङ्के लखनऊपरिसरस्य सभाकक्षे महामहोपाध्यायगोपीनाथकविराजस्मृतिव्याख्यानमालायाः द्वितीयं व्याख्यानं समपद्यत। अहमदाबादविश्वविद्यालयस्य आचार्यप्रवरस्तत्रभवान् गौतमपटेलः साहित्यिके पथा भाषमाणो गोपीनाथकविराजस्य योगतन्त्रपरां महनीयां स्मृतिं श्रोतृचित्तेषु सम्यगाविरकरोत्। अवसरेऽस्मिन् परिसरप्राचार्यः आध्यक्ष्यं निर्व्यूढवान्। परिसरप्राध्यापकाः छात्राश्च कार्यक्रमेण लाभान्विताः जाताः।

**क्रीडास्पर्धा –**

* **उत्तरक्षेत्रीय-अन्तर्विश्वविद्यालय-बैडमिण्टन् (पु.) स्पर्धा** – अस्याः स्पर्धायाः आयोजनं १८.१०.२०१० दिनाङ्कादारभ्य चण्डीगढस्थ-पञ्जाबविश्वविद्यालये सञ्जातम्। स्पर्धायामस्यां राष्ट्रिसंस्कृतसंस्थानस्य प्रतिनिधित्वं लखनऊ-परिसरच्छात्रैः विहितम्। प्राचार्यः सुरेन्द्रझा स्पर्धायां विहितभागान् परिसरच्छात्रान् सम्मानयन् तेभ्यः क्रीडागणवेषं प्रदत्तवान्। अध्यापकस्य डा. गजेन्द्रशर्मणः पर्यवेक्षकत्वे अरुणशर्मा (नायकः), गणेशदत्तः, नवीनकुमारः श्यामसुन्दरश्च तत्र भागमवहन्।

* **कबड्डीक्रीडादलं** – राष्ट्रियसंस्कृतसंस्थानस्य प्रतिनिधिभूतं परिसरीयच्छात्राणां कबड्डीक्रीडादलं 'अन्तर्विश्वविद्यालय-नार्थ जोन्-कबड्डी-टूर्नामेन्ट' इत्यत्र स्पर्धितुं डॉ. गजेन्द्रशर्मणोऽध्यापकस्य पर्यवेक्षकत्वे सोलनगरस्थे परमारविश्वविद्यालये २८.११.२०१० दिनाङ्के गत्वा तत्र स्पर्धाद्वये जयश्रियं प्राप्नोत्।




व्याख्यानमालायां भाषमाणः अङ्गराजचौधरी विद्वांसश्च

**पालि-प्राकृत-संस्कृतच्छायाकार्यशाला** – परिसरेऽस्मिन् पालिप्राकृतग्रन्थानां संस्कृतच्छाया कथं करणीया इति विषयमाधृत्य ११.११.२०१० तः १५.११.२०१० पर्यन्तं काचित् कार्यशाला सुसम्पन्ना। कार्यशालायामस्याम् आचार्यसङ्घसेनसिंहः, आचार्यः धर्मचन्दजैनः, आचार्यः एस.पी. नारङ्गः, आचार्यरामसागरमिश्रः, आचार्यः दीनानाथशर्मा, आचार्यजानकीप्रसादद्विवेदी, आचार्यः जगतरामभट्टाचार्यः इत्यादयो विद्वांसः उपस्थाय संस्थाने शोधाध्येतृभिः सम्पादित-संस्कृतच्छायाकार्यस्य गभीरनिरीक्षणं संशोधनं च विहितवन्तः। 'लखनऊपरिसरे सम्पूर्णस्यापि त्रिपिटकसाहित्यस्य संस्कृतच्छायाकार्यं प्रचलदस्ति। पालिभाषया त्रिपिटकत्वेन प्राप्तो ज्ञाननिधिः समस्तप्रपञ्चस्य कृते मङ्गलपदमर्हति। कदाचित् सम्पूर्णं त्रिपिटकसाहित्यं संस्कृतेन प्राप्यते स्म, इति प्रमाणानि तत्र तत्र लभ्यन्ते। किन्तु साम्प्रतं तत् संस्कृतत्रिपिटकं नैवोलभ्यते। अतो राष्ट्रियसंस्कृतसंस्थानम् एतस्य त्रिपिटकसाहित्यस्य संस्कृतीकरणं कारयितुं कञ्चित् प्रकल्पं प्रचालयदस्ति। अस्मिन्नैव क्रमे इयं कार्यशाला आयोजिता' इत्याशयं परिसरप्राचार्यः सुरेन्द्रझा प्राकटयत्। अत्रेदं विज्ञापनीयमस्ति यत् परिसरेऽस्मिन् प्राकृत-(आनलाइन)-कोषनिर्माणस्य प्रथमे चरणे ५०० पदानां कार्यं सुसम्पन्नम्। नातिविलम्बेन कोषोऽयं जालपुटेऽपि अवलोकयितुं शक्यते।

**डा. भीमराव-अम्बेडकरस्मृतिव्याख्यानमाला** – परिसरेऽस्मिन् १५.११.२०१० दिनाङ्के पालिप्राकृत-संस्कृतच्छायाकार्यशालायाः समापनकार्यक्रमः डा. भीमराव-अम्बेडकरस्मृतिव्याख्यानकार्यक्रमश्च संयुक्तरूपेण सम्पन्नः। अस्य कार्यक्रमस्य विषयः 'पालिसाहित्यस्य स्वरूपम्' इति आसीत्। डा. भीमराव-अम्बेडकरस्मृतिव्याख्यानमालाकार्यक्रमस्य आध्यक्ष्यम् आचार्यसङ्घसेनसिंहः निर्व्यूढवान्। मुख्यवक्तृत्वेन आचार्यः अङ्गराजचौधरी व्याख्यानं प्रास्तौत्। कार्यक्रमेऽस्मिन् लखनऊपरिसरस्य प्राचीनभारतीयेतिहासविभागस्य अध्यक्षचरः आचार्यः शिवनन्दनमिश्रः पालिभाषायाः ऐतिहासिकं विकासक्रमम् उपस्थापयत्। परिसरप्राचार्यः आचार्यः सुरेन्द्रझाः स्वागतभाषणं विहितवान्। कार्यक्रमसञ्चालनं डा. अवधेशचौबे धन्यवादज्ञापनं च आचार्यविजयकुमारजैनः अकुरुताम्।



परिसरवार्ता

## वार्ता – श्रीसदाशिवपरिसरः, पुरी



कार्यक्रमे विशिष्टानां स्वागतं व्याहरन्ती छात्रा

**बालचरसङ्घः** – १०.११.२०१० तः १९.११.२०१० दिनाङ्कपर्यन्तं श्रीसदाशिवपरिसरे शिक्षाशास्त्रिविभागस्य छात्राध्यापकानां छात्राध्यापिकानां च कृते भारत-स्काउट-गाइड्पक्षतः मौलिकपाठ्यक्रमः समायोजितः। परिसरप्राचार्यस्य डा. जि. गङ्गन्नावर्यस्य मार्गदर्शने, पाठ्यक्रमप्रमुखाणां श्रीललितमोहनपट्टनायक-प्राणकृष्णबेहेरा-कादम्बिनिदास- अनसूयासामन्तरायाणां तत्त्वावधाने, शिक्षाशास्त्रि-विभागाध्यक्षस्य डा. मदनमोहनझावर्यस्य, विभागीयाध्यापकानां च उपस्थितौ उद्घाटनकार्यक्रमोऽयं सुसम्पन्नः। समापनसमारोहे राष्ट्रियः उपाध्यक्षः श्रीकालीप्रसादमिश्रः उपस्थाय बालचरसङ्घस्य आभूषणैः सर्वान् विभूषितवान्।



नागानृत्यं प्रदर्शयन् परिसरच्छात्रः

**राज्यस्तरीयसंस्कृतशास्त्रीयवाक्स्पर्धा** – २७.११.२०१० तमे दिनाङ्के इयं स्पर्धा श्रीसदाशिवपरिसरे समायोजिता। तत्र ५० प्रतिस्पर्धिनः भागमवहन्। तेषु १३ विजेतारः श्रीसदाशिवपरिसरस्य एव छात्राः विविधविषयेषु चिताः। ते च यथा- साहित्ये श्रीकान्तशतपथी, व्याकरणे दीपिकासाहुः, धर्मशास्त्रे अलकामहारणा, सांख्ययोगे अजयकुमारपाण्डे, न्यायवैशेषिके मनोरमापण्डा, मीमांसायां सुव्रतषडङ्गी, वेदान्ते सूर्यनारायणमिश्रः, ज्योतिषे शशाङ्कशेखरनायकः, व्याकरणशलाकायां योगानन्दझा, अष्टाध्यायीकण्ठपाठे सुकन्यासेनापतिः, समस्यापूर्तौ सौम्यरञ्जनषडङ्गी, अन्त्याक्षर्यां शुभसुन्दरपण्डा च जेतृच्छात्रेषु अन्यतमाः आसन्।

## भोपालपरिसरे आयोजिताः कार्यक्रमाः




कार्यक्रमे भाषमाणः रामकिशोरशुक्लः विद्वांसश्च

**अधिराज्यीयशास्त्रीयस्पर्धा** – भोपालपरिसरस्य अधिराज्यीयस्पर्धा २५.११.२०१०तः २६.११.२०१० पर्यन्तं न्याय-मीमांसा-धर्मशास्त्र-सांख्ययोग-वेदान्त-ज्योतिष-साहित्य-व्याकरणादिषु शास्त्रीयविषयेषु सुसम्पन्ना। अस्या अधिराज्यीयशास्त्रीयस्पर्धायाः मुख्यातिथिरूपेण पतञ्जलिसंस्कृतसंस्थानस्य सभापतिः आचार्यः मिथिलाप्रसादत्रिपाठी, विशिष्टातिथिरूपेण कालिदाससंस्कृत-अकादम्याः निदेशकः प्रो. पी. एन्. शास्त्री, सारस्वतातिथिरूपेण जयपुरपरिसरस्य भूतपूर्वप्राचार्यः आचार्यः रामकिशोरशुक्लः तथा च अध्यक्षरूपेण परिसरप्राचार्यः आजादमिश्रः आसन्। अध्यक्षीयभाषणे प्रो. आजादमिश्रेण स्पर्धायाः महत्त्वमुपवर्णितम्, 'यस्य जीवने स्पर्धाभावना न भवति स न वर्धते। अतः छात्रैः सोत्साहेन भाषणादिस्पर्धासु भागः गृह्णीयः।' परिसरे शास्त्रीयस्पर्धायाः आरम्भे राष्ट्रियसंस्कृतसंस्थानस्य कुलगीतं युवसङ्गीतज्ञः सञ्जयद्विवेदी प्रस्तुतवान्। छात्राणां कृते संस्कृतभाषाकौशलवर्धनार्थं शास्त्रसंरक्षणार्थमिमाः स्पर्धाः आयोज्यन्ते। अस्यां स्पर्धायां उज्जयिनीस्थ-महर्षिपाणिनिसंस्कृतविश्वविद्यालयस्य, होशंगाबादस्थआर्षगुरुकुलमहाविद्यालयस्य, भोपालस्थ-शासकीय- रामानन्दसंस्कृतमहाविद्यालय-गुफामन्दिरस्य भोपालपरिसरस्य च प्रतिभागिनः भागं गृहीतवन्तः।



स्पर्धां प्रेक्षन्तः सहृदयाः

**वार्षिकस्पर्धा** – परिसरेऽस्मिन् नवम्बरमासस्य ०९-१६ दिनाङ्केषु सांस्कृतिक-शैक्षिक-क्रीडादीनां वार्षिकस्पर्धाः अभूवन्। प्राप्तस्थानानां प्रतिभागिनां नामानि उद्घोषितानि। वार्षिकसमारोहे पुरस्कारभाजां तेषां पुरस्कारेण सम्मानो भविता।

**भारत-स्काउट-गाइड-प्रशिक्षणम्** – भोपालपरिसरे दिसम्बरमासस्य १३-१९ दिनाङ्केषु भारत-स्काउट-गाइड-प्रशिक्षणमभूत्। प्रशिक्षणमिदं छात्राणां सर्वाङ्गीणविकासार्थमासीत्। अनेन प्रशिक्षणेन सर्वे छात्राः लाभान्विताः अभूवन्।

## जयपुरपरिसरस्य क्रियाकलापाः

### डा. मण्डनमिश्रस्मृतिव्याख्यानं विद्वत्सपर्यासमारोहश्च



अतिथीनां किञ्चन स्वागतदृश्यम्

राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे १८.११.२०१० दिनाङ्के डा. मण्डनमिश्रस्मृतिशोधसंस्थान-राष्ट्रियसंस्कृतसंस्थानजयपुरपरिसरयोः संयुक्तोपक्रमे मण्डनमिश्रस्मृतिव्याख्यानस्य आयोजनं कृतमभूत्। अत्र गुजरातप्रदेशस्य राज्यपालः म.म. डा. कमलाबेनीवालमहोदया मुख्यातिथिपदमलङ्कृतवती। अत्र सारस्वतातिथित्वेन दरभङ्गा-वाराणसीसंस्कृतविश्वविद्यालययोः कुलपतिचरः राष्ट्रियसंस्कृतसंस्थानस्य संस्थापकनिदेशक-चरश्च पण्डितप्रवरः रामकरणशर्ममहोदय उपस्थित आसीत्। विशिष्टातिथित्वं राजस्थान-संस्कृतशिक्षामन्त्रिणा पं. बृजकिशोरशर्मणा समलङ्कृतम्। आध्यक्ष्यन्तु देवर्षिकलानाथशास्त्रि-महोदयेन निर्व्यूढम्।




परिसरवार्तायाः लोकार्पणदृश्यम्

प्रसङ्गेऽस्मिन् रामकरणशर्मा 'कालिदासस्य सार्वभौमिकता' इत्यस्मिन् विषये स्वीयान् विचारान् प्रकटितवान्। श्रीधरवशिष्ठ-गजानन्दमिश्र-सतीशकीलावतप्रभृतयः अन्येऽपि विद्वांसः कार्यक्रमेऽस्मिन् स्वीयविचारान् प्रकटितवन्तः। अन्ते च मण्डनभारतीपुरस्कारेण २१,००० रूप्यात्मकेन अभिनन्दनपत्रेण च आचार्यरामकरणशर्ममहोदयस्य सम्माननमपि कृतम्। प्राचार्येण अर्कनाथचौधरीमहोदयेन परिसरस्योन्नत्यै मण्डनमिश्रेण कृतानां कार्याणामुल्लेखः कृतः। मञ्चसञ्चालनं आचार्यसुदेशकुमारशर्मणा कृतम्। आचार्यवासुदेवशर्मा कृतज्ञतां प्राकटयत्।

### पण्डितमधुसूदन-ओझास्मृतिव्याख्यानम्

जयपुरपरिसरे २४.११.२०१० दिनाङ्के मधुसूदन-ओझास्मृति-व्याख्यानकार्यक्रमः आयोजितोऽभवत्। अत्र मुख्यवक्तारौ राष्ट्रपतिसम्मानितः आचार्यः दयानन्दभार्गवः, नीदरलैण्डस्थ-लीडेनविश्वविद्यालयस्य आचार्यः हर्मनटीकेन महोदयश्च आस्ताम्। विशिष्टातिथित्वेन 'चिन्मयमिशन्' इति संस्थायाः स्वामिनी आचार्या विमलानन्दमहाभागा आसीत्। आध्यक्ष्यं परिसरप्राचार्येण आचार्येन अर्कनाथचौधरीमहोदयेन समलङ्कृतम्। भार्गवमहोदयः मधुसूदन-ओझामहाभागस्य वेदव्याख्यानपद्धतिं सम्यक्तया निरूपितवान्। सः तत्र निहितानि वैज्ञानिकतत्त्वानि स्फुटं प्रत्यपादयत्। टीकेनमहोदयः काव्योद्भवविषयके स्वकीयव्याख्याने भारतीयकाव्यपरम्परायाः वेदमूलकत्वं प्रत्यपादयत्। अध्यक्षत्वेन वदन् प्राचार्यमहोदयः वेदनिहितानां ज्ञानविज्ञानतत्त्वानां व्याख्यानं कृतवान्। कार्यक्रमे आचार्यः सुदेशकुमारशर्मा स्वागतभाषणम् आचार्यः वासुदेवशर्मा च धन्यवादज्ञापनं कृतवन्तौ। सञ्चालनं डा. रमाकान्तपाण्डेयेन कृतम्।




सभां सम्बोधयन्ती विमलानन्दवर्या, मञ्चे विद्वांसः

### राज्यस्तरीयसंस्कृतवाक्स्पर्धा शलाकापरीक्षा च

जयपुरपरिसरे २३.१०.२०१० दिनाङ्के राज्यस्तरीयसंस्कृतवाक्स्पर्धायाः शलाकापरीक्षायाश्च आयोजनं कृतम्। अत्र मुख्यातिथित्वेन राष्ट्रपतिसम्मानितः विद्वान् देवर्षिकलानाथशास्त्री, सारस्वतातिथित्वेन राष्ट्रपतिसम्मानितः सुकविः हरिरामाचार्यः, विशिष्टातिथित्वेन च आचार्यः सुरेन्द्रकुमारशर्मा आचार्यः सुभाषवेदालङ्कारश्च उपस्थिता आसन्। आध्यक्ष्यं परिसरप्राचार्येण अर्कनाथचौधरीमहोदयेन निर्व्यूढम्। अत्र राजस्थानस्य विविधमण्डलेभ्यः समागताः शताधिकाः छात्राः भागं गृहीतवन्तः। कार्यक्रमे आहत्य अष्टादशस्पर्धाः आयोजिता अभवन्।

कार्यक्रमस्य संयोजनं सुदेशकुमारशर्म-रमाकान्तपाण्डेयाभ्यां कृतम्। परिसरस्य नैके प्राध्यापकाः अत्र निर्णायकभूमिकां निर्व्यूढवन्तः। तत्र आचार्यवासुदेवशर्मा, आचार्यशिवकान्तझाः, आचार्यः के.पी. केशवन्, आचार्यः भगवतीसुदेश, डा. कमलनयनशर्मा, डा. रामकुमारशर्मा, डा. श्रीधरमिश्रः, डा. ईश्वरभट्टः, डा. विष्णुकान्तपाण्डेयः इत्यादयः विद्वांसः आसन्। राजस्थानसर्वकारस्य विविधसंस्कृत-संस्थानेभ्यः समागताः विद्वांसः अपि अत्र निर्णायकत्वेन आहूता आसन्। तत्र मोहनलालशर्म-द्विजेन्द्रनाथमिश्र-राजधरमिश्र-भगवानसहायशर्म-प्रभृतयः विद्वांसः विविधस्पर्धासु निर्णायकत्वेन भूमिकां निर्व्यूढवन्तः।

कार्यक्रमस्य समापनं २४.१०.२०१० दिनाङ्के अभवत्। अतिथिभिः साकं प्राचार्यः अर्कनाथचौधरी विजेतृछात्रान् पुरस्कारैः सभाजितवान्। कार्यक्रमस्यान्ते परिसरप्राचार्यः समागतविदुषामपि उत्तरीय-श्रीफलादि प्रदाय स्वागतं सम्पादितवान्। स्पर्धायां द्वितीय-तृतीयस्थानं प्राप्तवद्भ्यः छात्रेभ्यः अपि पुरस्काराः ग्रन्थाश्च वितरिताः। सुदेशकुमारशर्मा समागतानां कृते कार्तज्ञ्यभावं निवेदितवान्। डा. रमाकान्तपाण्डेयश्च समग्रस्य कार्यक्रमस्य सञ्चालनमकरोत्। अन्ते राष्ट्रगानेन सह कार्यक्रमः समाप्तिं प्राप्नोत्।




सरस्वतीपरिषदः एकं दृश्यम्

## जम्मूपरिसरवार्ता

**गान्धिजयन्ती-समारोहः**- महात्मनो गान्धिनो जन्मदिवसमुपलक्ष्य ०६.१०.२०१० दिनाङ्के प्राचार्यमहोदयस्याध्यक्षे परिसरे एका गोष्ठी समायोजिता। गोष्ठ्यामस्यां प्राचार्येण प्रो. विश्वमूर्तिशास्त्रिणा प्राध्यापकैश्च स्वीयाः सद्विचाराः प्रस्तुताः।

**सरस्वतीपरिषदायोजनम्** - १६.१०.२०१० दिनाङ्के परिसरे सरस्वतीपरिषदायोजिता। यस्यां किल शास्त्रीयभाषणश्लोक-पाठश्लोकान्त्याक्षरीस्पर्धासु विद्यार्थिनोऽहमहमिकया भागमगृह्णन्।

**श्रीश्रीश्रीस्वामिपादस्य शुभागमनम्** - ०१.११.२०१० दिनाङ्के परमादरणीयः काञ्चीकामकोटिपीठाधीश्वरः श्रीश्रीश्री १००८ जयेन्द्रसरस्वतीशङ्कराचार्यस्वामिपादः खलु स्वपदार्पणेन श्रीरणवीरपरिसरसौभाग्यश्रियः समुल्लासितवान्। तस्य अभिनन्दनात्मन्युपक्रमे हि परिसरप्राचार्येण प्रो. विश्वमूर्तिशास्त्रिणा सप्रावारकं स्मृतिचिह्नमेकं तस्मै समर्पितम्। श्रीश्रीश्रीस्वामिचरणेन स्वाशीराशिभिः सर्वेऽपि सुतरां सभाजिताः।



स्वामिपादः शुभाशीर्वादं प्रयच्छन्

## गरलीपरिसरस्य कार्यक्रमाः

**सरस्वतीपरिषदायोजनम्** - १८.१०.२०१० दिनाङ्के परिसरच्छात्राणां सरस्वतीपरिषदायोजिता, यत्र साहित्य-ज्यौतिषव्याकरणच्छात्रैः प्रतिस्वं शास्त्रीयं विषयमाश्रित्य व्याख्यानं कृतम्। व्याख्यानस्यानन्तरं प्रस्तुतविषये श्रोतृवक्तृकृतप्रश्नोत्तरमुखेन समीक्षा कृताऽभूत्। अनन्तरञ्च विभागाध्यक्षैः छात्राणां प्रमादस्य तेषु प्रतिबोधनं संशोधनं च विहितम्।

**पञ्जाबहिमाचलप्रान्तयोः वाक्स्पर्धा** - नवम्बरमासस्य १७-१८ दिनाङ्कयोः संस्थानमुख्यालयस्य निर्देशानुसारेण गरलीपरिसरस्य पञ्जाब-हिमाचलयोः पारम्परिक-संस्कृतशिक्षणसंस्थानां वाक्स्पर्धा समायोजिताऽभूत्। अत्र निर्णायकरूपेण आचार्यः रामदेवझा (श्रीलालबहादुरशास्त्रिविद्यापीठस्य ज्यौतिषविभागे पूर्वाचार्याः) आचार्यः हरिनारायणतिवारी (जम्मूपरिसरस्य व्याकरण- विभागाध्यक्षः) डॉ. रत्नमोहनझाः (संस्थानमुख्यालये मुक्तस्वाध्यायपीठसंयोजकः) आचार्य वाई. एस. रमेशः (मुक्तस्वाध्यायपीठस्य निदेशकः) समागताः।

**विशिष्टं व्याख्यानम्** - २९.११.२०१० दिनाङ्के सुविख्यातः संस्कृतविद्वान् आचार्यरामकरणशर्ममहोदयः 'कालिदासकाव्ये महाभारते च निरूपिता आदर्शाः' इति विषये विशिष्टं व्याख्यानं परिसरेऽस्मिन् विहितवान्। अस्मिन्नेव दिवसे आचार्यरामनारायणदासः परिसरस्यास्य व्याकरणविभागाध्यक्षचरः 'व्याकरणदर्शने शब्दब्रह्मणः स्वरूपम्' इति विषये वैदुष्यपूर्णं व्याख्यानम् अकरोत्।

**गीता-जयन्तीसमारोहः** - १७.१२.२०१० दिनाङ्के परिसरे प्राचार्यस्य प्रो. के. वी. सुब्बारायुडुमहोदयस्य निर्देशने महतोल्लासेन गीताजयन्तीसमारोहः समायोजितः। अत्र गरलीपरिसरस्य निकटवर्तिविद्यालयानां छात्राः निर्धारितानां गीताश्लोकानां कण्ठस्थपाठस्पर्धायाम् आमन्त्रिताः। परिसरच्छात्रा अपि अत्र सोत्साहं सहभागिनोऽभूवन्। इयं प्रतियोगिता प्राथमिक-माध्यमिक-महाविद्यालयच्छात्राणां पृथक्पृथगायोजिताऽभूत्। अस्मिन् समारोहे गीतोक्तं कर्मयोगमाश्रित्य डा. विजयपालशास्त्रिणः विशिष्टं व्याख्यानमभूत्। ज्यौतिष-विभागाध्यक्षः डा. मदनमोहनमहोदयः छात्रोपयोगिगीतोपदेशं सरलशैल्या प्रस्तुतवान्। समारोहाध्यक्षः परिसरप्राचार्यः के. वी. सुब्बारायुडु विस्तरेण श्रीमद्भगवद्गीताप्रतिपाद्यं वैशिष्ट्यमध्ययनफलं च विशिष्य वर्णितवान्।

परिसरवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य

# कुलगीतम्

हिमगिरिवदनं समुद्रचरणं
गङ्गागोदासुधारसम्।
विश्वविश्ववन्दितसद्विद्यं
राष्ट्रियसंस्कृतसंस्थानम्॥

योऽनूचानः स नो महानिति
शास्ति विमलमचलं भणितम्।
निखिलभारते व्याप्तपरिसरं
राष्ट्रियसंस्कृतसंस्थानम्॥

सवेदवेदाङ्गं षड्दर्शन-
पुराणकाव्यैरलङ्कृतम्।
बौद्धजैनशैवागममहितं
राष्ट्रियसंस्कृतसंस्थानम्॥

एकं सत्यमनन्तविग्रहं
समुपास्तेऽनिशमेकस्थम्।
जयति जयति सद्विद्यारत्नं
राष्ट्रियसंस्कृतसंस्थानम्॥

समेधयति भारतीः समस्ताः
प्रणमति निखिलां वसुन्धराम्।
जयति सकलपुरुषार्थसाधकं
राष्ट्रियसंस्कृतसंस्थानम्॥

– आचार्यः रामकरणशर्मा

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.III Issue No.10 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007